श्रीमत्सर्वतन्त्रस्वतन्त्र-

विद्वद्वरश्रीशेषकृष्णनिर्मितः

शूद्राचारशिरोमणिः

राजकीयसंस्कृतपाठशाला-सरस्वतीभवनोपाध्यक्षेण
साहित्याचार्यपदालङ्कृतेन श्रीमता नारायण-
शास्त्रिखिस्तेशर्मणा संस्कृतः ।

THE

S'ŪDRĀCHĀRA S'ĪROMAṆI

BY

S'RĪ S'EṢA KṚIṢṆA.

(PART II)

EDITED WITH INTRODUCTION ETC

BY

SĀHITYĀCHĀRYA

PANDIT NĀRĀYAṆA S'ĀSTRĪ KHISTE
Assistant Librarian, Govt. Sanskrit College,
Saraswati Bhawana Library, Benares.

1936

॥ श्रीः ॥

उपोद्घातः

अथायमुपक्रम्यते शूद्राचारशिरोमणिर्नाम श्रीकृष्णशेषप्रणीतो धर्मशास्त्रनिबन्धो मुद्रयित्वा प्रकाशयितुम् । अस्य प्रणेता श्रीकृष्णशेषः किल विश्वविख्यातवैदुषीवैभवः काशीनिवासी महाराष्ट्रब्राह्मण आसीत् । तत्पिता श्रीनृसिंहपण्डितोऽपि महाविद्वान् तात्कालिककाशिराजप्रधानामात्य आसीत् । श्रिया विद्यया च सममेव सम्भावितमिदं कुलमद्यत्वेऽपि काशिकमहाराष्ट्रब्राह्मणेषु प्रामुख्येन गण्यते ।

श्रीकृष्णशेषस्य समयस्तु षोडशशतकोत्तरभाग इत्येव कल्पयितुं शक्यते । यतस्तेन स्वकीयं 'कंसवधं' नाम नाटकमकब्बरपादशाहप्रधानसेनापतिटोडरमलपुत्रगिरिधारिनिर्देशेन प्रणीतमिति,

"तस्यास्ति तण्डनकुलामलमण्डनस्य
श्रीतोडरक्षितिपतेस्तनयो नयज्ञः ।
नानाकलाकुलगृहं स विदग्धगोष्ठी-
मेकोऽधितिष्ठति गुरुर्गिरिधारिनामा ॥
तेनाहं सबहुमानमाहूय ससमाजेनादिष्टोऽस्मि" ।
इति कंसवधोपोद्घातादवसीयते ।

इत्थं च अकबरसमयात् किञ्चिदनन्तरभावित्वं शेषकृष्णस्य वक्तुं युक्तम् । किञ्च, वैयाकरणसिद्धान्तकौमुदीकर्तुर्भट्टोजिदीक्षितस्य श्रीकृष्णशेषो गुरुरासीदिति,

निर्विशेषं महाशेषाच्छेषकृष्णमहं भजे ।

यो मामशेषाः शेषोक्तीर्विशिष्यैवाध्यजीगपत् ॥

इति सरस्वतीभवनस्थ शब्दकौस्तुभपुस्तकस्थश्लोकेन, पण्डितराजजगन्नाथकृत मनोरमाकुचमर्दनोपोद्घाताच्च निश्चीयते । तथा च भट्टोजिदीक्षितात् किञ्चित्पूर्वभाविनः शेषश्रीकृष्णस्य षोडशशतकोत्तरभागे ऽवस्थितिः कल्प्येत चेन्नैतदयोग्यं स्यात् ।

'शूद्राचारशिरोमणि' रित्याख्यः प्रकृतप्रबन्धस्तु श्रीमता शेषकृष्णेन कस्यचित् 'केशव' तनूजस्य 'पिलाजी इत्याख्यस्य दाक्षिणात्यभूपालस्य प्रार्थनया प्रणीत इति ग्रन्थोपोद्घाते स्वयमेवोक्तमस्ति ।

तथा हि--(ग्रन्थादौ)

अस्ति प्रत्यर्थिपृथ्वीपतिबलजलधिप्राशने कुम्भजन्मा
सन्मानार्हद्विजन्मार्चनपरिचरणप्रीणिताशेषदेवः ।
विष्वद्रीचीनकीर्तिस्फुरदमरसरिद्ध्रीचिनीकृताघ-
प्रोल्लाघस्फारसम्पद्वितरणनिरतः श्रीपिलाजीनृपालः ॥

धर्मानशेषान् विदुषामसौ मुखादाकर्ण्य तत्सङ्करशङ्कमानसः ।
शूद्रोपकारार्थमचीकरत् कृती चतुर्थवर्णोचितधर्मपद्धतिम् ॥

तदर्थनानुरोधेन कृष्णः शेषनृसिंहजः ।
आलोच्य धर्मशास्त्राणि तनुते शूद्रपद्धतिम् ॥ इति ।

ग्रन्थान्ते—

गुणागुणपरीक्षणक्षणविचक्षणोऽक्षुण्णं
वितीर्णबहुदक्षिणः स्वजनरक्षणे दक्षिणः ।
जयत्यतुलविक्रमोऽस्खलितदक्षिणाशामुखः
प्रतिक्षपितशात्रवः क्षितितले पिलाजीनृपः ॥
हरिचरणसरोजावाप्तजन्मा द्विजन्मा-
ऽर्पणविहितविभूतिः स्वर्धुनीपूर्वजन्मा ।
व्यरचयदतियत्नात् केशवस्यात्मजन्मा
सफललघुनिबन्धं शेषकृष्णां प्रयुज्य ॥ इति च ।

कोऽयं पिलाजीभूपालः ? कुत्रत्यः किं सामयिकश्चेति बहुशो-विचारयद्भिरपि नास्माभिः किमप्यद्ययावन्निश्चेतुमपारि तद्विषये ।

षोडशशतकोत्तरभागो हि शेषकृष्णस्य समय इति पूर्वोक्तैः प्रमाणैर्निश्चितमेव। तस्मिन् समये महाराष्ट्रेतिहासे कोऽपि प्रभावशाली पिलाजी नोपलभ्यते । मुधोलकरभोसलेवंशे सन् १५७८–१५९८ पर्यन्तमेकस्य पिलाजी राजस्योल्लेखो दृश्यते स च न केशव-पुत्र इति प्रकृते नोपयुज्यते । अन्ये 'पिलाजी जाधव' 'पिलाजी-गायकवाड' प्रभृतयस्तु प्रसिद्धाः प्रभावशालिनोऽपि पेशवेसमसा-मयिकाः प्रकृतग्रन्थकर्तुरर्वाचीना इति तैरपि न कार्यसिद्धिः । यदि-केचिदितिहासकोविदा अस्मदभीप्सित पिलाजीराजविषये किञ्चि-ज्जानीयुस्तर्हि तैरदं सानुग्रहं सूचनीयः ।

श्रीमान् श्रीकृष्णशेषस्तु महावैयाकरणः साक्षाच्छेष इव लोके पूज्यतेस्म । अस्य कवित्वमपि लोकोत्तरमासीत् । अनेन काशी-

पुरीपरिसरवर्ति ताण्डवपुराधीशानुजस्य नरोत्तमस्य निदेशेन 'पारिजातहरणचम्पू' निरमायि । महाविदुषाऽनेन विविधेषु शास्त्रेषु विविधा ग्रन्थाः प्रणीताः सन्ति । प्रकृतग्रन्थमालाया २२ संख्यायामेतत्कृता 'धर्मानुबन्धिश्लोकचतुर्दशी' मयैव सम्पादिताऽस्ति । अयं चास्य प्रकाशितो द्वितीयो धर्मशास्त्रनिबन्धः ।

शूद्राचारशिरोमणिः किल लघुरपि गभीरार्थो निबन्धोऽस्ति ।

यद्यपि शूद्रधर्मनिरूपकाः 'शूद्रकमलाकर' 'शूद्रतत्त्व' प्रभृतयः सन्ति भूयांसो निबन्धाः, तथाऽपि लघोरप्यस्य निबन्धस्य तदितरतथाभूतनिबन्धाऽपेक्षया जागर्त्येव महद्वैशिष्ट्यम्, यत्प्रेक्षावद्भिः स्वयं परिशील्यैव ज्ञातुं सुशकम् । पुस्तकद्वयाधारेण प्रकृतसंस्करणं साधितम् । तत्रैकं पुस्तकमत्रत्यमन्यत् भांडारकररिसर्च इंस्टिट्यूट–पूना तः समुपलब्धम् । पुस्तकद्वयमपि खण्डितमासीदिति पर्यवसाने ग्रन्थस्य कश्चिदंशस्त्रुटितएव स्थितः ।

अस्मिन्निबन्धे ग्रन्थकृता प्रतिलोमानुलोमसङ्कराणां सङ्करसङ्कराणां च नामानि, तदुत्पत्तयस्तदाजीविकाश्च सम्यक्सङ्गृहीता इति मयाऽपि पाठकजनसौकर्याय सोंऽशः पृथक्कृत्यात्र संयोजितः । अत्रत्यविषयाणां विशाला सूची चात्र संयोजिताऽस्ति । मन्ये एतावता नव्यधर्मनिबन्धदिदृक्षूणां विदुषां परितोषो भवेदिति ।

प्रकृतग्रन्थसंस्करणे ममाज्ञानवशात् सीसकाक्षरयोजकदोषाद्वा वर्तमानानि स्खलितानि समुदारचेतसो बुधा मर्षयेयुरिति तान् साञ्जलि प्रार्थये ।

सर्वदा मयि सानुग्रहदृशां काशिकराजकीयसंस्कृतपाठशालाप्रधानाध्यक्षाणां महामहोपाध्याय श्रीगोपीनाथकविराजमहोदयानां, काशिकराजकीयसंस्कृतपरीक्षाध्यक्षाणां डॉ० मङ्गलदेवशास्त्री एम्० ए०. डी. फिल्० महोदयानां च सादरमुपकारभारं स्मारं स्मारं तदनुग्रहेण पूर्णमिमं प्रबन्धं तेभ्यएव समर्प्य विरमामि विस्तरादिति शम् ।

मकरसंक्रान्तिः संवत् १९६२
सरस्वतीभवनम् काशी.

विद्वत्कृपाकांक्षी—
नारायणशास्त्री खिस्ते

* श्रीः *

शूद्राचारशिरोमणावुक्तानां सङ्करसङ्कराणामुत्पत्तयः, नामानि, आजीविकाश्च यथोक्ताः प्रदर्श्यन्ते—

---

१ भृज्जकण्ठः=व्रात्याद्विप्रपत्न्यां जातः ।
२ आवर्तकः=ब्राह्मण्यां भृज्जकण्ठाज्जातः ।
३ कटधानः=आवर्तात् द्विजभार्यायां जातः ।
४ पुष्पशेखरः=ब्राह्मण्यां कटधानाज्जातः ।
} विष्णुपूजनम्, नृत्यगीतादि, शङ्खवीणादिवादनमेतेषां जीविका ।

५ भोजकः=पुष्पशेखरायां विप्राज्जातः । सूर्यपूजनं जीविका ।

६ देवलकः=भोजकसुतायां द्विजाज्जातः। विष्णुपूजनं जीविका।

७ आभीरः=माहिष्यायां द्विजाज्जातः । क्षीरविक्रयो जीविका।

८ उद्बाहः=विप्राद्वैदेह्यां व्यभिचारतो जातः । छत्रधारणं, नारीविक्रयणं चास्य जीविका ।
(ब्राह्मण्यां वैश्याद्वैदेही)

९ वैष्टिकः=विप्रान्निषाद्यां जातः । स्कन्धवहनमस्य जीविका ।
(विप्राच्छूद्रायां जातो निषादः)

१० विप्रान्मागध्यां जातः=कारागृहस्य गोपनं तज्जीविका । (क्षत्रियायां वैश्याज्जातो मागधः)

११ अम्बष्ठायां द्विजाज्जातः । कांस्यकर्मकरणं जीविका ।

१२ उग्रायां द्विजाज्जातः । कुम्भकारः ।

१३ मल्लः । नियुद्धम् ।

१४ वैतालिकः । कामशास्त्रेण भाट्टकर्मणा वा जीवनम् ।

१५ कीनाटः । ताम्रकुट्टनम् ।

१६ वणिग्जनात् विप्रायां जातः। अन्तःपुरपालनम्,पण्याङ्गनासङ्गमनम् ।

१७ पारशव्यायां महिष्याज्जातः । मालाकरणम् ।

१८ सुताद्वैदेह्यां जातः । सूपकरणम् ।

(ब्राह्मण्यां क्षत्रियात्सूतः । वैश्याद्वैदेहः ।)

१९ मैत्रेयुकः । घण्टावादनं मङ्गलगानं च जीविका

(शूद्राद्वैश्यायां जात आयोगवः, वैदेहादम्बष्ठायां जातो हरिमेखलः।)

२० करणादायोगव्यां सैरन्ध्रः । गन्धकर्मकरणं पुष्पचन्दनपण्यादि· (वैश्याच्छूद्रायां करणः ।) शृङ्गारकरणं च जीविका ।

२१ उग्रायां पारशवाज्जाङ्गिकः । पादवेगवान् ।

२२ आरूढपतितात् शैवात् पाशुपतात् शूद्रपत्न्यां जातो भस्माङ्कुरः । शिवार्चनम्, शिवदायेन जीवनम्, शिवाय दत्तेन चण्डीशभागाख्येन जीविका ।

२३ क्षत्रियादुग्रायां क्षेमकः स एव प्रतीहारः । (क्षत्रियाच्छूद्रायामुग्रः)

२४ अम्बष्ठाद्वैदेह्यां जातः कुशीलवः । नर्तनादिकरणं जीविका । (विप्राद्वैश्यायां वैदेही)

२५ आभीराज्जातो निर्मण्डलकः । बाणपिच्छकरणम्, करपत्रैः शराणां रचना च जीविका ।

२६ मागधादुग्रायां जातःकुन्तलो नापितः । श्मश्रुकर्म, क्षौरकर्मकरणम्, नखकर्तनम्, जीविका । अयं शूद्रेभ्योऽधिकः । (क्षत्रियाच्छूद्रायामुग्रः, क्षत्रियायां वैश्यान्मागधः) शूद्रकन्यासमुत्पन्नोऽसंस्कृतो ब्राह्मणोऽपि नापितः।स च शूद्रधर्माधिकः।(मन्वनुसारेण)

२७ माहिष्येण करण्यां रथकारः । शिल्पवृत्त्या जीवनम । वचनादस्योपनयनाधिकारः ।

२८ वैदेहान्माहिष्यां कायस्थः। (क्षत्रियाद् वैश्यायां माहिष्यः, वैश्याद् ब्राह्मण्यां वैदेहकः ।) देशजातानां लिपीनां लेखनम्, गणकत्वम्, लिपिलेखनसाधनं चातुर्वर्ण्य सेवा च जीविका। असौ पञ्चसंस्कारवान् । शिखा, यज्ञोपवीतं, आरक्तवस्त्रं, देवतास्पर्शनं च कायस्थस्य वर्ज्यम् ।

२६ करिण्यां मालाकारात् शालक्यः । मणिरन्ध्रकरणं जीविका । मणिहार इतिख्यातः । स्मृत्यन्तरे मञ्जुरिति संज्ञा ।

३० मञ्जोःकुलाल्यां शाल्मलः । नागवल्लीविक्रयो जविका ।

३१ मालाकारात् क्षत्रियायां शिलीन्ध्रः । मर्दनक्रियो, अङ्गमर्दनं जीविका । शूद्रेभ्यो हीनः ।

३२ शिलीन्ध्रात् क्षत्रियायां कोल्हाटीनामा । यद्रूपीति प्रसिद्धः ।

३३ वैदेहाद्रूपकभार्यायां जातःपुत्र आन्वसिकः । पाचक इति प्रसिद्धः ।

३४ वैश्यात् करण्यां जातो वत्सपालकः ।

३५ कटधानान्मल्लुभार्यायामजापालः ।

३६ सैरन्ध्रयां क्षेमकात् शय्यापालः । राज्ञां शय्यासंविधाने कुशलः । (क्षेमकः प्रतीहारी ।)

३७ कर्मचण्डालभार्यायां पुष्पशेखराज्जातो मण्डलकः । शुनां मण्डलपोषणं जीविका ।

३८ वदिनीशूद्रसंयोगात् स्यंदोलिकः । असौ चतुर्वर्णविहीनः । मञ्जिष्ठारङ्गकरणं, तेन वाससां चित्रणम्, हस्तलेख्यं त्रिस्थितं च तज्जीविका । स एव सौचिकः । कर्त्तरीसूचीकर्तनं जीविका ।

३९ शूद्रयां निषादाज्जातः कुक्कुटः । स एव रङ्गशालकः । रङ्गशालासु नाटकानां विधानम्, अष्टधातूनां व्यवसायश्च जीविका । अयमन्त्यजैः समः ।

४० मागध्यां क्षत्रियादुल्मुकः ।=लोहकर्मकारी । अयं चातुर्वर्ण्यात् हीनः । अन्त्यजादुत्तमः ।

४१ उग्रात्पारशवापुत्रो मौःकलिः तैलिकः । (उग्राद्वैदेह्यां जातो रजकः।) (क्षत्राच्छूद्रायामुग्रः, ब्राह्मण्यां वैश्याद्वैदेही) तैलिकोऽन्त्यजातिभ्य उत्तमः । शुद्धतैलविक्रयोऽस्य जीविका । तिलहिंसायन्त्रशब्दश्रवणेन पापं भवतीति मौःकलिको नगराद्बहिर्निवास्यः ।

४२ रथकारस्त्रियामायोगवात् सूत्रधारः। असौ जायाजीवः शैलूषः नाट्य शास्त्रज्ञः। जलमण्डपिकादीनि सूत्राणि रचयेत्। नगराद्बहिर्निवासोऽस्य।

४३ सूतात् कुकुट्यां कुरविन्दः। पट्टांशुके रतः। अन्त्यजधर्माचारः।

४४ वेन्यामावर्तकादम्बर सूत्रवायकः। (वेन्या नट स्त्री)

४५ आभीर्यां कुक्कुटात्पुत्रः सौवीरः। =कोसटः। सर्वजातीनां वस्त्रकरणं जीविका।

४६ तद्वैपरीत्याज्जातो नीलीकर्ता।

४७ कुन्तलान्मञ्जुभार्यायां जातो वर्वरः।

४८ मैत्राज्जाङ्गिकायां वन्धुलः, स एव मालकः।

४९ कैवर्त्यां पौष्टिकात्पांशूलः=शणवायकः।

५० ऋजुकण्ठाच्छागल्यां औरभ्रो मेषपालकः।

५१ क्षेमकादिङ्गुभार्यायामावर्त उष्ट्रपालकः।

५२ मल्लात् देशिकायां रौमिकः। लवणकर्म तज्जीविका।

५३ द्विजादायोगव्यां धिग्वणः। कवचादिकरणं जीविका, चर्मणाऽश्वपल्याणकरणम्। मोची इति प्रसिद्धः।

५४ वैदेहकात् कार्वोलिकायां मेदसंज्ञकः। वृक्षारण्य पर्वतेषु निवासेन जीविका। गोंड इति प्रसिद्धः।

५५ पारशवादायोगव्यां कैवर्तः सर्वजातिभ्यो हीनः। जालेन मत्स्यघातः। नौकाप्रवहणं चास्य जीविका।

५६ यतेर्विधवायां जातः कर्मचण्डालः। वापी कूपादि मृत्कर्मकरणं तज्जीविका। असौ स्पृश्यएव।

५७ निषादाच्छूद्रपत्न्यां जातः पुक्कसः। अन्त्यजसदृशः। अरण्यजीवघातेन तद्वृत्तिः।

५८ निषादात् धिग्वण्यां चर्मकारः। अन्त्यजातिभ्यो हीनः, उपानहां शिरस्त्राणस्य च करणेन गोमहिषीचर्मणा च तज्जीवनम्।

५९ वेनाद्‌ाभीर्यां शौण्डिकः । शौष्कल इत्यपि । असावधमः सर्वधर्म बहिष्कृतः, सुराविक्रयोऽस्य जीविका ।

६० जाङ्घिकात् कैवर्त्यां मङ्गुष्ठः (रजकः) खटकानां चूर्ण कृत्वा पाच नेन तज्जीविकाः । अयमस्पृश्यः ।

६१ धिग्वणात् कुम्भकार्यां चित्रकरः । चित्रलेखनं जीविका । वर्णबाह्यः ।

६२ वैशिकात् कुरुविन्दायां किंशुकः । लेपकर्मकृत् । अयमन्त्यजः । वंशपात्रविक्रयोऽस्य जीविका ।

६३ कर्मचाण्डालकात् वैदेह्यां वुरुडजातिः । वंशविदारणं कर्म ।

६४ निषादा द्वैदेह्यां गारुडः । सप्तान्त्यजसधर्मा ।

६५ आयोगवात धिग्वण्यां दुर्लभः । करपत्रकरणं जीविका । असाव· न्त्यजमुख्यः ।

६६ चाण्डालात् कैवर्त्यां सौनिकः । अजमेषादिहिंसा, तन्मांसविक्रयो जीविका ।

६७ शौण्डिक्यां डिण्डिमात् कीनाशः ।

६८ चाण्डालात् पुक्कस्यां श्वपाकः । श्वमांसपचनं जीविका ।

६९ निषाद्यां चण्डालाज्जातः डोंबसंज्ञः । मृताश्वखरहरणं जीविका । श्मशाने वासः ।

७० शैलन्ध्रैर्मेदयोषित्सु म्लेच्छजातय उत्पन्नाः ।
म्लेच्छाः मन्वनुसारेण । १ पौड्रक २ चोड्र ३ द्रविड ४ काम्बोज ५ यवन ६ शक ७ पारद ८ वाह्लीक ९ चीन, १० किरात ११ दरद इत्यादयः ।

एतेषामपि 'जात्युत्कर्षो युगे ज्ञेयः' इतियाज्ञवल्क्यानुसारेण शोभनैः कर्मभिर्जन्मान्तरे, जात्युत्कर्षो भवितुं शक्नोति ।

* श्रीः *

॥ शूद्राचारशिरोमणौ विषयानुक्रमणिका ॥

	पृ०
१ मङ्गलाचरणम् ।	१
२ आश्रयदातृ राजकीर्तनम् ।	१—२
३ ग्रन्थकरणप्रस्तावः ।	२
४ शूद्रोत्पत्तिवर्णनप्रसङ्गेन वर्णचतुष्टयोत्पत्तिकथनम् ।	२—३
५ ब्राह्मणत्वक्षत्रियत्वादे र्विवचनम् ।	३—४
६ कुण्डगोलापध्वंसजादीनां जातिविषये विचारः ।	४—८
७ षण्णामनुलोमानां प्रतिलोमानां च विषये विचारः ।	८-१०
८ वर्णानुलोमप्रतिलोमेषु तारतम्यविचारः ।	१०-१४
९ अनुलोमप्रतिलोमधर्मविचारः ।	१४-१७
१० सङ्करसङ्कराणामुत्पत्तिनामाऽऽजीविकादिविचारः ।	१७-३२

प्रथमपरिच्छेदसमाप्तिः ।

द्वितीयपरिच्छेदारम्भः ।

११ शूद्रकर्मवृत्तयः ।	३३
१२ उच्छिष्टान्नभक्षणविचारः ।	३३-३५
१३ समर्थेन शूद्रेण आपन्नो ब्राह्मणोऽपि भरणीयः ।	३६
१४ शूद्रस्य पाकयज्ञकरणाधिकारविचारः निषिद्धानां परिगणनं च ।	३७
१५ शूद्रस्य वपनविषये विचारः ।	३८-३९
१६ शूद्रस्य ब्राह्मणाराधनमेव मुख्यम्, द्विजाराधनं वा ।	३९

पृ०

१७ तदशक्तौ कारुकर्मणा जीवनम् । ३९

१८ शूद्रेण करणीयानि कारुकर्माणि, सामान्यतः शूद्रधर्माः, शूद्रेण विक्रेयाणि, शूद्रस्यानापद्येव मधुमांसादिविक्रयनिषेधश्च । ४०

१९ अत्यन्तापदि मधुमांसादिविक्रयस्याभ्यनुज्ञानम् । ४१

२० उशनसोदाहृताः शूद्रधर्माः, शूद्रस्य चण्डालत्वप्रापकानि च । ४१

२१ शूद्रस्य वेदश्रवणानधिकारः, वेदाङ्गाध्ययनानधिकारश्च । ४२

२२ शूद्रस्य संस्कृतोच्चारणप्रतिषेधः । ४३-४४

२३ शूद्रसन्निधौ पुराणाध्ययननिषेधः तथाकरणे प्रत्यवायश्च । ४५

२४ स्त्रीशूद्रादीनामपि पुराणपठनश्रवणाद्यधिकारप्रमाणवचनोपन्यासः पूर्वपक्षत्वेन । ४६

२५ पुराणश्रवणायोपविष्टेषु द्विजेषु तच्छुश्रूषाप्रसङ्गागतेन शूद्रेण श्रोतव्यम् , न तु प्राधान्येनेत्युत्तरम् । ४७

२६ ब्राह्मणपुरस्कारेण शूद्रस्य पुराणश्रवणविधिर्भविष्योक्तः । ४७-४८

२७ इत्थमपि शूद्रस्य श्रवणमेवानुज्ञातं, न त्वध्ययनम् । ४८

२८ शूद्रस्य वैदिकपौराणमन्त्रश्रवणपठनाधिकारविषये विप्रतिपत्तिः । ४८-५०

२९ कल्पतरुकारमतानुसारेण शूद्राणां वैदिकमन्त्रएवानधिकारो न पौराणेष्वपि । तेन पौराणधर्माणां स्त्रीशूद्रान् प्रतिविशिष्य विधानात्तेषां च मन्त्रविशिष्टतयवोत्पन्नत्वादगत्या कर्माङ्गभूतपौराणमन्त्रपाठोऽप्यस्तीति । मध्यदेशाचारोऽप्येवमिति, शूद्राणां साक्षान्निषिद्धानां धर्माणां निवृत्तिः, साक्षाद्विहितानां प्रवृत्तिः । ५०

३० अविहिताप्रतिषिद्धानामपि धर्माणां प्रवृत्तिः, किन्तु सर्वमप्येतदमन्त्रकमेव । श्रौतस्मार्तानां केषां चिद- २
मन्त्रकाणामपि निषेध इति निष्कर्षः । ५१

३१ स्वस्वधर्माभिरतानां फलम् । ५१

पृ०

३२ स्वधर्मानुगतस्य देशधर्मगतस्य शूद्रस्य संस्थानं वि
 हाय धर्मोऽस्यावश्यमा विहिता इति महाभारतानुसारेण ।
 ब्रह्मचारिवेषं च भैक्ष्यचर्या न कार्या । ५१-५२
३३ भविष्यद्धर्मकथनस्याजेन शूद्रस्य निषिद्धान् कलियुग
 धर्माननुक्रम्य मात्स्यपुराणोक्तानां धर्माणां निरूपणम् । ५२-५३
३४ तन्निषेधः । ५४
३५ शूद्रस्य पतन हेतवः पराशरोक्ताः । ५४
३६ सुरापशूद्रस्यैतत् प्रायश्चित्तं नास्ति, किन्तु यत्प्रायश्चि
 त्तमुक्तं तच्चतुर्थांशन्यूनं कल्प्यम् । ५६
३७ साधारणधर्माः । ५६
३८ शूद्राणां विद्याग्रहनधिकारात् कथं मोक्षधर्मेष्वधिकार·
 इति शङ्का । तेषां वेदाध्यापार्थविचारेऽनधिकारेऽपि
 द्विजशुश्रूषामसङ्कोपितानां ग्रन्थकथनपुराणाद्यगत·
 मोक्षधर्मविचारे ऽधिकारोऽविरोधः । ५६
३९ उक्तार्थोपोद्बलकानि स्कान्दमूलरंहितावाक्यानि,
 भारतीयमोक्षधर्मवाक्यानि च । ५७
४० यत्र वर्णविशेषोपादानं, शूद्रं प्रति निषेधो वा नास्ति तत्र·
 तस्याधिकारोऽस्त्येव । ५७
४१ उक्तार्थोपोद्बलकानि वचनानि । ५७-५८
४२ महापातकप्रायश्चित्तं शूद्रस्य ब्राह्मणापेक्षया चतुर्गुणम् । ५८
४३ अनुलोमेषु न्यूनं प्रतिलोमेषु चाधिकं प्रायश्चित्तम् । ५९
४४ स्त्रीबालरोगिवृद्धादेरर्द्धं प्रायश्चित्तम् । ५६
४५ यस्मिन् वयसि पुंसामर्द्धम् तस्मिन् वयसि स्त्रीणां पाद·
 मात्रम् । ५६-६०
४६ बालस्य कियत् प्रायश्चित्तमिति विचारः । ६०
४७ शूद्रस्य प्रायश्चित्तापदेशे पर्षदनिषेधः । ६०-६१

पृ०

४८ शूद्रस्य निर्विघ्नत्वेन वैदिकमन्त्रसाध्य जपहोमविवर्जितं कृच्छ्रादिव्रतदानरूपमेव प्रायश्चित्तम् । ६१

४९ पञ्चगव्यं स्त्रीणां विकल्पितम् । ६२

५० शूद्रस्य प्रायश्चित्तानङ्गपञ्चगव्यपाननिषेधः । ६२

५१ शूद्रेण प्रायश्चित्ताङ्गजपहोमौ विप्रद्वारा कार्यौ । ६२

५२ द्विजातिशुश्रूषैव शूद्रस्य मुख्यंकर्म, तदविरोधेनैव क्रियमाणं कर्म सफलं भवति । ६३

५३ शूद्रस्य धनसञ्चयनिषेधः । ६४

५४ मेधातिथ्यनुसारेण शूद्रस्य विहितनिषिद्धयोर्विचारः । ६४-६६

५५ दैवो ब्राह्मणश्चेति द्विविधःसंस्कारः, तत्र वैदिकमन्त्रसाध्यो दैवसंस्कारस्तु शूद्रस्य न भवति । गर्भाधानादिषोडशस्मार्तब्राह्मणसंस्कारेषु विवाहोऽन्त्यसंस्कारश्च शूद्रस्यामन्त्रको भवति । ६७

५६ शूद्रस्य सामान्यतः संस्कारनिषेधेऽपि केषांचित् प्रतिप्रसवः । यथा—पञ्चमहायज्ञश्राद्धगर्भाधानानि, नामकरणं, निष्क्रमणं, अन्नप्राशनं, कर्णवेधश्च भवति । ६८-६९

५७ 'विवाहमात्रसंस्कारं शूद्रोऽपि लभते सदा' इति ब्रह्मपुराणीय वाक्यविचारः । ६९

५८ शूद्रस्य चूडाकर्मनिषेधः । ६९

५९ प्रसङ्गात् चूडाकर्मविचारः ७०

६० शूद्रस्योपनयननिषेधः ७०

६१ येषु जातकर्मसीमन्तोन्नयनादिषु संस्कारेषु शूद्रस्यानधिकारः, तत्कर्मकाले कुलपरंपरागतं मङ्गलाचारमात्रं कार्यम्, न पुनः संस्कारः । ७१

६२ आभ्युदयिकं श्राद्धं शूद्रस्यामान्त्रेनैव भवति । शूद्राणां सन्ध्यावन्दनं नास्ति । ७१-७२

	पृ०
६३ स्त्रीशूद्रयोः प्रणवे नाधिकारः ।	७२
६४ वैष्णवमन्त्रदीक्षा तु शूद्राणां भवति ।	७२
६५ पञ्चरात्रानुसारेण शूद्राणां दीक्षा भवति ।	७२-७३
६६ शक्तिविनायक मन्त्रदीक्षापूजनादौ शूद्रस्याधिकारोऽस्ति ।	७३
६७ यज्ञोपवीतं शूद्रेण न धार्यम् ।	७४
६८ शिवविष्ण्वादिदेवतानां दूरात्पूजने शूद्रस्याधिकारः, न तुस्पर्शने ।	७५
६९ स्त्रीशूद्रादिस्पृष्टशिवलिङ्गविष्ण्वादिनमने त्रैवर्णिकानां निषेधः ।	७५
७० स्वधर्महीनेन शिवपूजा न कार्या ।	७६
७१ ब्राह्मणस्य तु स्वधर्मत्यागिनोपि शिवलिङ्गादिस्पर्शपूजनादौ न निषेधः ।	७६
७२ इदानीन्तनप्रतिष्ठितलिङ्गेष्वेव स्त्रीशूद्रादीनां स्पर्शानधिकारः, न पुनः पुराणप्रतिष्ठितेष्वनादिलिङ्गेष्वपि ।	७६-७७
७३ द्विजसेवकानां सच्छूद्राणां द्विजसेवाऽविरोधेन मासिमासि वपनं, द्विजोच्छिष्टभोजनं, द्विजशुश्रूषयावृत्तिः पञ्चमहायज्ञनिष्ठत्वंचेति धर्माः । तदितरेषां सामान्यधर्मा अहिंसादयएव । भगवन्नामकीर्त्तने तु सर्वेषामस्त्यधिकारः ।	७७
७४ आह्निकक्रमेण शूद्रे कर्तव्यविशेषः । प्रातः कृत्यम् ।	७८
७५ प्रातःस्मरणीयदेवताः ।	७९
७६ शूद्रस्य मूत्रपुरीषोत्सर्ग नियमः ।	७९
७७ शूद्रस्य यज्ञोपवीताभावात्तत्कार्यकरत्वेन वस्त्रोत्तरीयादेरपि न कर्णनिधानावश्यकत्वम् ।	७९-८०
७८ शूद्रस्य मूत्रपुरीषोत्सर्गादौ नियमास्तत्र प्रमाणानि च ।	८०-८२
७९ मूत्रपुरीषोत्सर्गसमये उदकपात्रं करे न कर्त्तव्यमिति नियमः ।	८२

पृ०

८० वाय्वग्निविप्रादित्यगोजलानि पश्यतो विण्मूत्रोत्सर्गे निषेधः। ८२

८१ पल्वलतडागनदीप्रस्रवणतुषाङ्गारकपालदेवतायतन रा-
जमार्गश्मशानक्षेत्रखलोपरोधं परित्यज्य, छायाचतुष्प-
थोदकोदकान्त मार्गवृक्षमूलचैत्यश्वभ्रबिलानि परित्य-
ज्यमेहेत। ८२-८३

८२ विण्मूत्रादीनावामहस्तेनायाज्ञिक वीरणाद्यैर्मार्जनं कर्त-
व्यम्। ८३

८३ अधः शौचे दक्षिणहस्तं न योजयेत्। नाभेरुर्ध्वं वामह-
स्तेन न शोधयेत्। शौचमत्यन्तमावश्यकम्। ८४

८४ विण्मूत्रोत्सर्गानन्तरं शौचव्यवस्था, कीदृशी मृत्तिका
ग्राह्येति विचारः। वर्णभेदेन मृत्तिकाभेदः, मृत्तिका
लेपप्रमाणं च। ८५-८६

८५ गृहस्थापेक्षया ब्रह्मचारिणां द्विगुणंशौचम्, वनस्थानां
त्रिगुणम्, यतीनां चतुर्गुणम् स्त्रीशूद्रन्योरर्द्धमानम्। ८७

८६ अनुपनीतानां द्विजानां स्त्रीशुद्रादीनां च गन्धलेपक्षयकर-
मेव शौचम्। आर्तस्य यथाशक्ति। ८७

८७ यद्दिवा विहितं शौचम्, रात्रौ तदर्द्धं कार्यम्। तदर्द्ध-
मातुरे, तदर्द्धमध्वनि। ८७-८८

८८ शूद्रस्य विवाहात्प्राक्शौचे संख्यानियमो नास्ति।
विवाहानन्तरं संख्यानियमाभावे प्रत्यवायः। पाद-
प्रक्षालने द्विजातेः पुर्वं दक्षिणस्य, ततोवामस्य। शूद्रे-
त्वेतद्विपर्ययः। शौचानन्तरं परस्य स्वस्य वा विण्मूत्रं-
दृष्ट्वा आदित्याग्निसोमगोब्राह्मणान् पश्येत। ८८

८९ आचमन विचारः। ८६-६१

६० आचमन निषेधः। ६१-६४

६१ आचमनानुकल्पाः। ६४-६५

			पृ०
९२ दन्तधावनम् ।	...	...	९५-१००
९३ केशप्रसाधनम् ।	...	...	१००-१०१
९४ स्नानविधिः	...	...	१०१-१०७
९५ स्नानप्रयोगः ।	...	...	१०७-१११
९६ ऊर्ध्वपुण्ड्रविधिः ।	...	...	१११-११३
९७ तर्पणम् ।	...	...	११३-११८
९८ तर्पणीयक्रमः ।	...	...	११८-१२६
९९ तर्पणस्नानाङ्गार्घ्यदानविधिः ।		...	१२६-१२७
१०० पूजाविधिः ।	...	...	१२८
१०१ पीठार्चनम् ।	...	...	१२९
१०२ पूजनीयपञ्चायतनदेवताः ।		...	१३०-१३४
१०३ उपचारवैविध्यम् ।	...	...	१३५-१४१
१०४ धूपदीपनैवेद्यानि ।	...	...	१४१-१४५
१०५ प्रदक्षिणविचारः ।	...	...	१४५-१४६
१०६ प्रणामविचारः ।	...	...	१४६-१४७
१०७ निर्माल्यलङ्घनदोषः ।	...	...	१४७
१०८ निर्माल्यप्रतिपत्तिः	...	...	१४८-१४९
१०९ पार्थिवलिङ्गपूजाप्रकारः ।	...	...	१५०-१५१
११० पुष्पविचारः ।	...	...	१५१-१५४
१११ अपराधविचारः ।	...	...	१५४-१५७
११२ पञ्चमहायज्ञाः ।	...	...	१५७-१७०
११३ नित्यश्राद्धम् ।	...	...	१७०-१७६
११४ भोजनविधिः ।	...	...	१७६-१८४
११५ भोजनोत्तरकर्म । इत्याह्निक विवेकः ।	...		१८४-१८९
११६ शूद्रस्याशौचविचारः ।	...	...	१८९-२०५
११७ शूद्रप्रेतनिर्हरणे विशेषः ।	...	...	२०५-२०६

पृ०

११८ तोयाञ्जलिपिण्डदानादिविचारः । ... २०६-२०९

११९ एकोद्दिष्टसपिण्डीकरणादिनिर्णयः । ... २०९-२१७

१२० श्राद्धनिर्णयः । २१७-२१९

१२१ पार्थिवलिङ्गपुजाक्रमः । २१९-२२०

ग्रन्थसमाप्तिः ।

हुतिमन्त्राश्च स्वाहान्ता एव ब्राह्मणैः पठनीयाः । शूद्रस्तु तूष्णीमेव नम इति वा जपन्तत्तत्कर्म कुर्यादित्याहुः ।

अत्र व्यासः—

चतुरस्रं त्रिकोणं च वर्तुलं चार्द्धचन्द्रकम् ।
कर्त्तव्यमानुपूर्व्येण ब्राह्मणादीनां तु मण्डलम् ॥

शङ्खः—

चतुःकोणं द्विजस्य स्यात् त्रिकोणं क्षत्रियस्य तु ।
मण्डलाकृति वैश्यस्य शूद्रस्याभ्युक्षणं मतम् ॥

भविष्यत्पुराणे—

भोजनात्किञ्चिदन्नाऽग्रं धर्मराजाय वै बलिम् ।
चित्राय चित्रगुप्ताय प्रेतेभ्यश्च बलिं हरेत् ॥

मनुः—

भुक्तवत्सु तु विप्रेषु स्वेषु भृत्येषु वै बहिः ।
भुञ्जीयातां ततः पश्चादवशिष्टं तु दम्पती ॥

बर्ज्यान्यासनान्याह प्रचेताः—

गोशकृन्मृन्मयं पित्तं तथा पालाशपिप्पलम् ।
लोहवत्तु सदैवार्कं वर्जयेदासनं बुधः ॥

अत्रिः—

आसने पादमारोप्य यो भुङ्क्ते ब्राह्मणः क्वचित् ।
मुखेन चान्नमश्नाति तुल्यं गोमांसभक्षणम् ॥

हारीतः—

न कार्ष्णायसे न मृत्पात्रे न भिन्नेऽवकीर्णे इति ।

कार्ष्णायसं लौहम् । अवकीर्णं शूद्रभोजनादिदूषितम् ।

वृद्धमनुः—

ताम्रपात्रे न भुञ्जीत भिन्नकांस्ये मलाविले ।
पलाशपत्रपद्मेषु गृही वैश्वदेवं चरेत् ॥
ब्रह्मचारियतीनां तु चान्द्रायणफलं लभेत् । इति ॥

पद्मपुराणे—

भोजनाद्ब्रह्मपत्रेषु कपिलादुग्धपानतः ।
व्रतं विना मुनिश्रेष्ठ शूद्रो नरकमाप्नुयात् ॥
अज्ञानाद् भुञ्जते ब्रह्मपत्रेषु द्विजसत्तम ।
व्रतं विनापि शूद्रो यो गां दत्वा स विशुध्यति ॥

नृसिंहांघ्रिमहोदधौ—

करञ्जपिप्पलवटवृक्षकुम्भ्यर्कतिन्दुकाः ।
एषां पत्रेषु नाश्नीयात्कोविदाराम्रयोरपि ॥
विपर्यस्तेषु पत्रेषु तिर्यक्पत्रेषु दारुजे ।
अजपी ब्रह्मपत्रेषु शूद्रस्यूते तदाहृते ॥
कण्टकैः सीविते पत्रे तथा वेणुतलेन च ।
वल्लीपलाशपत्रेषु स्थलजे पौष्करे तथा ॥
गृहस्थश्चेत्समश्नीयाच्छुध्यै चान्द्रायणं चरेत् ।

एक एव तु यो भुङ्क्ते विमले कांस्यभाजने ॥
चत्वारि तस्य वर्द्धन्ते आयुः प्रज्ञा यशो बलम् ।
यत्यादीनां तन्निषिद्धम् ।
ताम्बूलाभ्यञ्जनं चैव कांस्यपात्रे च भोजनम् ।
यतिश्च ब्रह्मचारी च विधवा च विवर्जयेत् ॥
इति प्रचेतःस्मरणात् ।

व्यासः—

पञ्चार्द्रो भोजनं कुर्यात्प्राङ्मुखो भोजनमास्थितः ।
हस्तौ पादौ तथैवास्यमेषां पञ्चार्द्रता मता ॥

सकामं प्रति मनुः—

आयुष्यं प्राङ्मुखो भुङ्क्ते यशस्यं दक्षिणामुखः ।
श्रियं प्रत्यङ्मुखो भुङ्क्ते ऋतं भुंक्ते उदङ्मुखः ॥

ब्रह्मपुराणे—

यस्तु पाणितले भुंक्ते यस्तु फूत्कारसंयुतम् ।
प्रसृताङ्गुलिभिर्यश्च तस्य गोमांसवच्च तत् ॥

सङ्ग्रहे—

पुत्रवान् स्वगृहे नित्यं नाश्नीयादुत्तरामुखः ।
सोमवारे तथाऽभ्यङ्गं वर्जयेत्तु सदा बुधः ॥ इति ।

ब्रह्मपुराणे—

अन्नं दृष्ट्वा प्रणम्यादौ प्राञ्जलिः कथयेत्ततः ।

अस्माकं नित्यमस्त्वेतादिति भक्त्या च वन्दयेत् ॥

विष्णुपुराणे—

अश्नीयात्तन्मयो भूत्वा पूर्वं तु मधुरं रसम् ।
लवणाम्लौ तथा मध्ये कटुतिक्तादिकांस्ततः ।
प्राक् द्रवं पुरुषोऽश्नन्वै मध्ये तु काठिनाशनः ॥
अन्ते पुनर्द्रवाशी च तदारोग्यं न मुञ्चति ।

ब्रह्मपुराणे—

सर्वाङ्गुलीभिरश्नीयान्नावधूनेत्करं क्वचित् ।
कुर्यात्क्षीरान्तमाहारं न च पश्चात्पिबेद्दधि ॥
जठरं पूरयेदर्द्धमन्नैर्भागं जलस्य च ।
वायोः संवरणार्थाय चतुर्थमवशेषयत् ।
अथैकपङ्क्त्यां नाऽश्नीयात्संवृतः स्वजनैरपि ॥
को हि जानाति किं कस्य प्रच्छन्नं पातकं महत् ।
अवर्जनीयत्वे तु पंक्तेः किञ्चिद्भेदं कृत्वा भोक्तव्यम् ॥

पंक्तिभेदकान्याह वृहस्पतिः—

अग्निना भस्मना चैव स्तम्भेन सलिलेन च ।
द्वारेण चैव मार्गेण पंक्तिभेदो बुधैः स्मृतः ॥

अत्राऽन्यो विशेषो भक्त्याभक्त्यादिविभागश्च गोविन्दार्णवाह्निके द्रष्टव्यः ।

पैठीनसिः—

लवणं व्यञ्जनं चैव घृतं तैलं तथैव च ।
लेह्यं पेयं च विविधं हस्तदत्तं न भक्षयेत् ॥
दर्व्या देयं श्रृतान्नं तु समस्तव्यञ्जनानि च ।
उदकं यच्च पक्वान्नं वा दर्व्या दातुमिच्छति ॥
स भ्रूणहा सुरापश्च स स्तेनो गुरुतल्पगः ।

मनुः—

पृथक् पानं पुनर्दानं सामिषं पयसा निशि ।
दन्तच्छेदनमुष्णं च सप्त शत्रुषु वर्जयेत् ॥

आश्वमेधिके—

उदक्यामपि चण्डालं श्वानं कुक्कुटमेव च ।
भुञ्जानो यदि पश्येत्तु तदन्नं तु परित्यजेत् ॥

गौतमः—

काहलभ्रमणं पानकक्रचोलूखलस्य च ।
एतेषां निनदो यावत्तावत्कालमभोजनम् ॥

आपस्तम्बः—

द्वावेवाश्रमिणौ भोज्यौ ब्रह्मचारी गृही तथा ।
मुनेरन्नमभोज्यं स्यात्सर्वेषां लिंगिनां तथा ॥

मुनिरत्र वानप्रस्थो यतिश्च । लिङ्गिनः कापालिकादयः ।

अंगिराः—

षण्मासान्यो द्विजो भुंक्ते शूद्रस्यान्नं विगर्हितम् ।
स तु जीवन्भवेच्छूद्रो मृतः श्वा चाभिजायते ।
परपाकरुचिर्न स्यादनिन्द्यामन्त्रणादृते ।
वाक्पाणिपादचापल्यं वर्जयेच्चातिभोजनम् ॥ इति ।

तथा,

अमृतं ब्राह्मणस्यान्नं क्षत्रियस्य पयः स्मृतम् ।
वैश्यस्यत्वन्नमेवान्नं शूद्रस्य रुधिरं स्मृतम् ॥

एवं समान्यतः शूद्रस्य पक्वान्नसाधारणस्याभोज्यत्वे प्राप्ते कांश्चिदनुजानाति याज्ञवल्क्यः—

शूद्रेषु दासगोपालकुलमित्रार्द्धसीरिणः ।
भोज्यान्ना नापितश्चैव यश्चाऽऽत्मानं निवेदयेत् ॥

दासो गर्भदासः । अर्द्धसीरी कृषिफलार्द्धग्राही । एषामपि स्वधर्म्मभ्रष्टानामाममेव भोज्यं न पक्वम् । यदाह मनुः—

नाऽद्याच्छूद्रस्य पक्वान्नं विद्वानश्राद्धिनो द्विजः ।
आददीताममेवान्नं तस्यादावेकरात्रिकम् ॥

एकरात्रिकं एकाहपर्याप्तम् । अश्राद्धिन इति स्वविहितकर्मभ्रंशोपलक्षणार्थम् । अश्राद्धिन इति विशेषणात्स्वधर्म्मरतस्य शूद्रस्य पक्वान्नमपि भोज्यमिति गम्यते ।

तदपि नियमयति हारीतः—

कन्दुपक्वं स्नेहपक्वं पायसं दधिसक्तवः।
एतान्यशूद्रान्नभुजो भोज्यानि मनुरब्रवीत् ॥

लौहकटाहः कन्दुः।

एवं, गोरसञ्चैव सक्तूँश्च तैल्यं पिण्याकमेव च।
अपूपान्भक्षयेच्छूद्राद्यच्चान्यत्पयसा कृतम् ॥

इति सुमन्तुवचनम्।

सम्प्रोक्ष्य विप्रो गृह्णीयाच्छूद्रान्नं गृहमागतम्। इति विष्णुपुराणवचनं च परिगणितशूद्रविषयम्। शूद्रस्य न कदाचनेत्यादिनिषेधवचनं चेतरशूद्रविषयम्। अनापद्विषयं च।

तथा च याज्ञवल्क्यः—

अदत्वाऽप्यग्निहीनस्य नान्नमद्यादनापदि। इति।

अग्निहीनः शूद्रः। अत्रेदं कल्पतरुसिद्धान्तसर्वस्वम्।

अविशेषेण शूद्रस्य पक्वमपक्वं वान्नमभोज्यम्। आपदि त्वाममेवैकाहिकं ग्राह्यम्। दासादीनां तु अनापद्यपि आमं ग्राह्यं आपदि पुनः पक्वमपि। कैन्दुपक्वादि तु शूद्रमात्रस्य भोज्यमिति। भोज्यान्नता चेयं युगान्तरएव।

शूद्रेषु दासगोपालकुलमित्रार्द्धसीरिणाम् ।

भोज्यान्नता गृहस्थस्येति कलियुगवर्ज्यप्रकरणे कालखण्डे क्रतुवचनात् इति मर्यादा। आश्वमेधिके—

पानीयानि पिबेद्येन तत्पात्रं द्विजसत्तम ।
अनुच्छिष्टं भवेत्तावद्यावद्भूमौ न निःक्षिपेत् ॥

अत्र स्मरन्ति—

सर्पिर्भुक्त्वा तु यो विप्रस्तस्मिन्पात्रे पिबेज्जलम् ।
जलपात्रे च यो भुंक्ते आसुरं तत्प्रकीर्त्तितम् ॥ इति ।

अथ भोजनोत्तरकर्म ।

देवलः—

भुक्त्वोच्छिष्टं समादाय सर्वस्मात्किंचिदाचमेत् ।
उच्छिष्टभागधेयेभ्यः सोदकं निर्वपेद्भुवि ।

मन्त्रोपि, रौवे पुण्यनिलये पक्ष्मार्बुदनिवासिनाम् ।
प्राणिनां सर्वभूतानामक्षय्यमुपतिष्ठताम् ॥

व्यासः—

अर्द्धं पीत्वा तु मण्डपमर्द्धं त्याज्यं महीतले ।
रसातलगतान्नागांस्तेन प्रीणाति नित्यशः ॥

तथा,

तस्मिन्नाचमनं कुर्याद्यत्र भाण्डे च भुक्तवान् ।
यद्युत्तिष्ठत्यनाचान्तो भुक्तवानाचमेत्ततः ॥

स्नानं सद्यः प्रकुर्वीत सोऽन्यथा पतितो भवेत् ।

एवमन्तर्भुक्त्वा गृहाद्बहिराचमनं देशाचारमात्रं न पुनर्युक्तम् ।

कौर्मे—

आचम्याङ्गुष्ठपानीयं पादाङ्गुष्ठे तु दक्षिणे ।
निःस्रावयेद्धस्तजलमूर्ध्वहस्तः समाहितः ॥
हुतानुमन्त्रणे कुर्याच्छ्रद्धायामिति मन्त्रतः ।

निःस्रावणे मन्त्रमाह बौधायनः—

अङ्गुष्ठमात्रः पुरुषो ऽङ्गुष्ठं चैव समाश्रितः ।
ईश्वरः सर्वजगतस्तेन प्रीणातु विश्वभुक् ॥

अयं च मन्त्रः शूद्रस्य न भवति स्मार्त्तत्वात् ।

व्यासः—जानुनी स्पृश राजेन्द्र भर्त्तव्या बहवो यदि ।

ब्रह्मपुराणे—संमार्ज्य जानुबाहू च गोप्रदानफलं लभेत् ।

विष्णुपुराणे—ततः प्रशान्तचित्तस्तु कृतासनपरिग्रहः ।
अभीष्टदेवतानां च कुर्वीत स्मरणं नरः ।

ब्रह्मपुराणे—

आचान्तोऽप्यशुचिस्तावद्यावत्पात्रमनुद्धृतम् ।
उद्धृतेऽप्यशुचिस्तावद्यावन्नो मृज्यते मही ।

अत्रिः—भूमावपि हि लिप्तायां तावत्स्यादशुचिः पुमान् ।
आसनादुत्थितस्तावद्यावन्न स्पृश्यते मही ।

अथ ताम्बूलविधिः ।

मार्कण्डेयः—

भूयोऽप्याचम्य कुर्वीत ततस्ताम्बूलभक्षणम् ।

वसिष्ठः—

सुपूगं च सुपत्रं च चूर्णेन च समन्वितम् ।
अदत्वा द्विजदेवेभ्यस्ताम्बूलं वर्जयेद् बुधः ॥
एकपूगं सुखारोग्यं द्विपूगं निःफलं भवेत् ।
अतिश्रेष्ठं त्रिपूगं स्यादधिकं चैव दुष्यति ॥
पर्णमूले भवेद्व्याधिः पर्णाग्रे पापसम्भवः ।
चूर्णपर्णं हरेदायुः शिरा बुद्धिविनाशिनी ॥
तस्मादग्रं च मूलं च शिरां चैव विशेषतः ।
चूर्णपर्णं वर्जयित्वा ताम्बूलं चर्वयेद् बुधः ॥
पर्णाग्रे पर्णमूले च चूर्णपर्णं द्विपर्णकम् ।
तदधावनपर्णं च शक्रस्यापि श्रियं हरेत् ॥
अनिधाय मुखे पर्णं पूगं खादति यो नरः ।
सप्तजन्मदरिद्रत्वमन्ते विष्णुं च न स्मरेत् ॥
तर्जन्यां चूर्णमादाय ताम्बूलं तु न खादयेत् ।
यदि खादयते मूढो रौरवं नरकं व्रजेत् ॥
रात्रौ खदिरताम्बूलं प्रमादेन कृतं यदि ।
यावज्जन्मदरिद्रत्वं भविष्यति न संशयः ॥

ब्रह्मचारी यतिश्चैव विधवा च रजस्वला ।
प्रत्येकं मांसतुल्यं तन्मिलितं सुरया समम् ॥

अथ दक्षः—

भुक्त्वा च सुखमास्थाय तदन्नं परिणामयेत् ।
इतिहासपुराणाभ्यां षष्ठसप्तमकौ नयेत् ॥
अष्टमे लोकयात्रा च बहिः सन्ध्या ततः पुनः ।

याज्ञवल्क्योऽपि—

अहःशेषं सहासीत शिष्टैरिष्टैश्च बन्धुभिः ।

एवं दिनशेषं समाप्य सन्ध्याकाले व्यतीते रात्रावपि वैश्वदेवं कृत्वा सति सम्भवे अतिथिपूजां विधाय बुभुक्षा चेदस्ति तर्हि रात्रावपि भुञ्जीत ।

केचन वैश्वदेवं रात्रौ नेच्छन्ति ।

ततः कृतकर्त्तव्यः शयीत । तदुक्तं विष्णुपुराणे—

कृतपादादिशौचश्च भुक्त्वा सायं ततो गृही ।
गच्छेच्छय्यामस्फुटितां ततो दारुमयीं नृप ॥

शङ्खः—

न विशीर्णायां खट्वायां नान्यवर्णोपसेवितायां अनभ्युक्ष्य च ।

पैठीनसिः -

अतैलाभ्यक्तशिराः स्वपेत् । नादीक्षितः चर्मणि सुप्यात् ।

विष्णुः—

नार्द्रवासाः स्वपेत्। न पालाशशयने न पञ्चदारुकृते न गजभग्नकृते न विद्युद्दग्धे नाग्निप्लुष्टे न वालमयीं शय्यामधितिष्ठेदनास्तृतामिति।

पञ्चदारुः पञ्चविधं काष्ठं तेन कृते। गजभग्नो गजदन्तः।

तथा, निद्रां सम्यगनासाद्य ताम्बूलं वदनात्त्यजेत्।

पर्यङ्कात्प्रमदां भालात्पुण्ड्रं पुष्पाणि मस्तकात्।
गदप्रमादयक्षा हि भयदाः सर्वदा इमे॥

मार्कण्डेयः—

प्राक्शिराः शयने विद्याद्धनमायुश्च दक्षिणे।
पश्चिमे प्रबला चिन्ता हानिर्मृत्युस्तथोत्तरे॥

गार्ग्यः—

स्वगृहे प्राक्शिराः शेते श्वाशुरे दक्षिणाशिराः।
प्रत्यक्शिराः प्रवासे तु न कदाचिदुदक्शिराः॥
अत्र दिवाविहितकर्मणां दैवादतिपाते स्मर्यते।
दिवोदितानि कर्माणि प्रमादादकृतान्यपि॥
शर्वर्याः प्रथमे यामे तानि कुर्याद्यथाक्रमम्।

संग्रहे—

शर्वर्याः प्रथमे यामे दिवा कर्माणि कारयेत्।

ब्रह्मयज्ञं च सौरं च वर्जयेद्धि विशेषतः ॥

सौरं सूर्यसुक्तजपादि ।

तथा, वैश्वदेवं तथा रात्रौ कुर्याद्बलिहुतिं तथा ।

महतः पञ्च यज्ञांस्तु दिवैवेत्याह गौतमः ।

अत्रान्ये विशेषा गोविन्दार्णवे द्रष्टव्याः ।

इत्याह्निकविधिः ।

शिष्टानामवधिर्गुणैकजलधिः सत्सम्पदां शेवधिः
श्रीमत्केशवदासतः समजनि श्रीमान्पिलाजीति यः ।
तस्यैतस्य कृते कृतेऽत्र कृतिना कृष्णेन शेषेण स –
च्छूद्राचारशिरोमणावहरहःकृत्ये विवेको ऽभवत् ॥

इति श्री शूद्राचारशिरोमणौ आह्निक-
विवेकः समाप्तः ।

शूद्रस्याशौचविषये तु –

बौधायनः –

शुध्येद्विप्रो दशाहेन द्वादशाहेन क्षत्रियः ।
वैश्यः पञ्चदशाहेन शूद्रो मासेन शुध्यति ।

विष्णुरपि –

ब्राह्मणस्य जननमरणयोर्दशाहमाशौचं, द्वादशाहं राजन्यस्य, पञ्चदशाहं वैश्यस्य, मासं शूद्रस्येति ।

देवलः—

शूद्रस्य त्रिंशता शुद्धिरिति । एतदसच्छूद्रपरम् ।

'शूद्रस्तु मासमासीत निजकर्मविवर्जितः' इति मार्कण्डेयवचनात् । निजकर्म पञ्चमहायज्ञं द्विजशुश्रूषातदुच्छिष्टभोजनमासिकवपनादि । तद्वतस्तु न्यायवर्त्तिसच्छूद्रापरपर्यायस्य पञ्चदशाहमेवाशौचम् ।

तदाह याज्ञवल्क्यः—

क्षत्रस्य द्वादशाहानि विशां पञ्चदशैव तु ।
त्रिंशद्दिनानि शूद्राणां तदर्द्धं न्यायवर्त्तिनामिति ॥

मनुनाऽप्युक्तम्—

शूद्राणां मासिकं कार्यं वपनं न्यायवर्त्तिनाम् ।
वैश्यवच्छौचकल्पश्च द्विजोच्छिष्टं च भोजनमिति ॥

वैश्यवदिति । पञ्चदशाहमित्यर्थः ।

यत्तु शातातपः—'शूद्रो विंशतिरात्रेण शुध्यते मृतसूतके' इति तत्तु किंचिदपकृष्टसच्छूद्राविषयम् । अपकृष्टता च पञ्चमहायज्ञाद्यनुष्ठानमन्तरेण द्विजशुश्रूषामात्रपरत्वेन बोध्या ।

यत्त्वाङ्गिरसोक्तम् । एतदत्यन्तसद्वृत्ताचारवैराग्यादिसम्पन्नसच्छूद्रविषयतया योज्यम् ।

अन्ये तु शूद्रमात्रस्य विंशतिरात्रपक्ष आपत्कल्पः ।

दशाहपक्षस्तु सच्छूद्रस्याप्यापत्कल्प इत्याहुः । देशाचारेण व्यवस्थेत्यन्ये । अयं च सर्वेषामप्याशौचसंकरो युगान्तरविषयः। यथा चोक्तं हेमाद्र्युदाहृतादित्यपुराणे— कलियुगवर्ज्यान्यनुक्रम्य—वृत्तस्वाध्यायसापेक्षमघसङ्कोचनं तथेत्यनन्तरम् — कलौ युगे त्विमान् धर्मान्वर्ज्यानाहुर्मनीषिणः इति ।

एकाहाद्ब्राह्मणः शुध्येद्योऽग्निवेदसमन्वितः ।
त्र्यहात्केवलवेदस्तु निर्गुणो दशभिर्दिनैरित्यादिना ।

तथा,

चत्वार्यधीतवेदानामहान्याशौचमिष्यते ।
वेदाग्नियुक्तविप्रस्य त्र्यहमाशौचमिष्यते ॥
एताभ्यां श्रुतयुक्तस्य दिनमेव विधीयते ।
एतैः सार्कं कर्मयुक्तः सद्यः शुध्येदसंशयः ॥
एतैर्युक्तस्य राज्ञस्तु द्वादशैकादशा दश ।
वैश्यस्यैव पञ्चदश द्वादशैकादश क्रमात् ॥
अर्द्धमासं तु शुश्रूषोः शूद्रस्याशौचमिष्यते ।

इत्यादिना देवलादिभिर्यदघसङ्कोचनमुक्तं तत्कलौ न कार्यमित्यर्थः ।

वृत्तमश्वस्तनिकत्वं त्र्यहैहिकत्वाग्निशुश्रूषादि ।
स्वाध्यायो वेदाध्ययनादि तद्धेतुकम् ॥

तेन कलौ दशाहद्वादशाहपञ्चदशाहमासपक्षा एव चातुर्वर्ण्यस्य क्रमाद्भवन्तीत्यर्थः ।

तदाह हारीतः—

दशाह एव विप्रस्य सपिण्डमरणे सति ।
कल्पान्तराणि कुर्वाणः कलौ मुह्यति किल्बिषीति ।

विप्र इत्युपलक्षणम् । तद्वद्वर्णानाम् ।

अत एव शातातपः—

मन्त्रावश्यवर्जनाच्छूद्रस्य नाधिकारो न प्रतिषेधो मासमित्येके इति । कदर्यादेस्तु ब्राह्मणादिवदेवाशौचम् ।

यदाह दक्षः—

व्याधितस्य कदर्यस्य ऋणग्रस्तस्य सर्वदा ।
क्रियाहीनस्य मूर्खस्य स्त्रीजितस्य विशेषतः ।
व्यसनासक्तचित्तस्य पराधीनस्य नित्यशः ॥
श्राद्धत्यागविहीनस्य अश्मान्तं सूतकं भवेत् ।
न शौचं तु कदाचित्स्याद्यावज्जीवं तु सूतकमिति ॥

व्याधिरचिकित्स्यः । कदर्यो देवलेनोक्तः—

आत्मानं धर्मकृत्यं च पुत्रदारांश्च पीडयेत् ।
लोभाद्यः पितरो भृत्यान्स कदर्य इति स्मृतः। इति ।

ऋणग्रस्तो ऽपरिहार्यऋणः । सङ्करेषु तु ब्रह्म-

पुराणम् —

शौचाशौचं प्रकुर्वीरन् शूद्रवर्णसङ्करा इति। जननाशौचे तु शूद्रस्य कर्मानधिकारो यावदाशौचम्। अस्पृश्यत्वं तु सूतिकाया एव दशाहम्।

पिता तु स्नानमात्रेण स्पृश्यो भवति।

यदाहाऽङ्गिराः —

सूतके सूतिकावर्जमङ्गस्पर्शो न दुष्यति।
संस्पर्शे सूतिकायाश्च स्नानमेव विधीयते॥

संवर्त्तोऽपि —

जाते पुत्रे पितुः स्नानं सचैलं तु विधीयते।
माता शुध्येद्दशाहेन स्नानात्तु स्पर्शनं पितुः॥

शुध्येत्स्पर्शार्हा स्यादित्यर्थः। कर्माधिकारस्तु मासान्तएवेति। एतच्च पितुः स्पृश्यत्वं सूतिकासम्पर्काभावे। तस्मिंस्तु सति सूतिकावद्दशाहानन्तरमेव।

तदाह पराशरः —

यदि पत्न्यां प्रसूतायां द्विजः सम्पर्कमिच्छति।
सूतकं तु भवेत्तस्य यदि विप्रः षडङ्गवित्॥

द्विज इत्युपलक्षणम्।

यदि विप्र इत्यपि कैमुतिकन्यायः।

तेन शूद्रेऽप्येतत्समानं तुल्यन्यायत्वात्। सपत्नमा-

तृष्वप्याह ब्रह्मपुराणम्—

अथान्या मातरस्तद्वत्तद्गृहं न व्रजन्ति चेत् ।
सपिण्डाश्चापि संस्पृश्याः सन्तः सर्वेऽपि नित्यशः ॥

तद्वत् पितृवत् । यदि तद्गृहं सूतिकागृहं गत्वा तान् स्पृशेयुस्तदा स्नानमात्रेण स्पृश्याः । अथ ताः स्पृशेयुस्तदा पितृवदेव दशरात्रस्पृश्या इत्यर्थः । सूतिकायास्तु स्पर्शाधिकारमाह प्रचेताः—

सूतिका सर्ववर्णानां दशरात्रेण शुध्यति ।
ऋतौ तु न पृथगाशौचं सर्ववर्णेष्वयं विधिः ॥

सर्ववर्णेष्विति वचनाच्छूद्राया अपि दशरात्रेणैव । ऋतुनिमित्तं तु ब्राह्मण्यादेरेव त्रिरात्रमेव न पृथगाशौचमिति वचनात् ।

यत्तु ब्रह्मपुराणे—

ब्राह्मणी क्षत्रिया वैश्या प्रसूता दशभिर्दिनैः ।
गतैः शूद्रा च संस्पृश्या त्रयोदशभिरेव च । इति ।

तदसच्छूद्रविषयम् ।

अस्याः कर्माधिकारमाह पैठीनसिः—

सूतिकां पुत्रजननीं विंशतिरात्रेण स्नातां कर्म्माणि कारयेन्मासेन स्त्रीजननीमिति । कर्माणि दैवानि पित्र्याणि च । शूद्रायास्तु कर्मयोग्यता पुत्रजनने स्त्री-

जनने वा मासापगमेनैव भवतीति मदनपालः ।

युक्तं चैतत् । तस्या मासाशौचे विंशतिरात्रे कर्माधिकारविरोधात् ।

शावाशौचेऽपि स्पर्शकालमाहाङ्गिराः—

दशमेऽहनि शूद्रस्य कार्यमस्पर्शनं बुधैः ।
मासेनैव तु शुद्धिः स्यात्सूतके मृतके तथा ॥

संवर्त्तः—

चतुर्थेऽहनि विप्रस्य षष्ठेह्नि क्षत्रियस्य च ।
अष्टमे दशमे चैव स्पर्शः स्याद्वैश्यशूद्रयोः ॥

देवलः—

आशौचकालाद्विज्ञेयं स्पर्शनं तु त्रिभागतः ।
शूद्रविट्क्षत्रविप्राणां यथा शास्त्रप्रदर्शनात् ॥
त्रिचतुःपञ्चदशभिः स्पृश्या वर्ण्याः क्रमेण तु ।
भोज्यान्नो दशभिर्विप्रः शेषा द्वित्रिषडुत्तरैः ॥

अत्र षडुत्तरैर्दशभिरित्येतन्न्यायवर्त्तिशूद्रविषयम् । एवं द्वादशरात्राद्याशौचपक्षेऽपि त्रिभागकल्पनेनाद्यभागमतीत्यैव स्पर्शनीयतेति ध्येयम् ।

स्रावपातयोराशौचे विशेषमाह मरीचिः—

स्रावे मातुस्त्रिरात्रं स्यात्सपिण्डाशौचवर्जनम् ।
पाते मातुर्यथामासं पित्रादीनां दिनत्रयम् ॥

मासत्रयमध्ये गर्भस्य स्रसनं स्रावस्तस्मिन्सति मातुस्त्रिरात्रमाशौचं सपिण्डानां तु पित्रादीनामाशौचं न भवतीत्यर्थः। पितुस्तु स्नानमात्रं भवतीत्याह वृद्धपराशरः। गर्भस्रावे मासतुल्या रात्रयः स्त्रीणाम्। स्नानमेव पुरुषस्येति। पुरुषस्य पितुरित्यर्थः। मासतुल्या रात्रय इति तु पातविषयम्।

स्रावपातौ लक्षयति लघुपराशरः—

आचतुर्थाद्भवेत्स्रावः पातः पञ्चमषष्ठयोः।
अतऊर्ध्वं प्रसूतिः स्याद्दशाहं सूतकं भवेदिति॥

एतच्च स्रावे त्रिरात्रवचनं ब्राह्मणविषयम्। इतरेषु तैनैव विशेषाभिधानात्। तद्यथा—

[अत्र ग्रन्थस्त्रुटितः प्रतिभाति। उपलब्धादर्शपुस्तकद्वयेऽपि तावतोंऽशस्यानुपलब्धेर्यथालब्धएव ग्रन्थः प्रकाश्यते।]

उभयोः जन्ममरणयोः तेनायमित्यर्थः। एकेन ब्राह्मणादिना आनुलोम्येन नानावर्ण्यासु स्त्रीषु जनितानां नानावर्ण्यानां भ्रातॄणां मध्ये यदन्यजातीयस्य भ्रातृजननमरणनिमित्तकमन्यजातीयस्य भ्रातुरापतति तज्जीवति पितरि पैतृकं पितृवर्णोदितं यदशौचं दशरात्रषड्रात्रादिकं तत्पुत्राणां भवति। तस्मिन्मृते मातृव-

र्णोचितम् । उभयोरपि मृतयोः सतोर्यस्य जन्ममरणे वृत्ते तज्जात्युक्तमेव सर्वेषां भ्रातॄणां तत्स्यादिति विष्णुः । पत्नीनां दासानामानुलोम्येन स्वामितुल्यमाशौचं मृते स्वामिन्यात्मीयम् । आनुलोम्येनापकृष्टवर्णपत्नीनामपकृष्टवर्णदासानां चोत्कृष्टवर्णस्वामितुल्यमाशौचम् । उत्कृष्टवर्णपत्न्यादीनां च प्रातिलोम्येन स्वाशौचमेवेत्यर्थः । एतच्च स्वामिना सह एकग्रामवासे ।

यदाह बृहस्पतिः—

दासान्तेवासिभृतकाः शिष्याश्चैकत्रवासिनः ।
स्वामितुल्येन शौचेन शुध्यन्ति मृतसूतके ॥

अन्तेवासी नैष्ठिकब्रह्मचारी । शिष्यस्य पृथगुपात्तत्वात् ।

शङ्खः—

हीनवर्ण्या तु या नारी प्रमादात्प्रसवं व्रजेत् ।
प्रसवे मरणे तज्जमाशौचं नोपशाम्यति ॥

हीनवर्ण्या शूद्रा । प्रमादात् । रागकृतपरपुरुषसंसर्गात् ।

अयं भावः । अविवाहितशूद्रा तावदन्तिमवर्णेन सह समासाद्य यदि प्रसूता भवति, तदा तत्प्रसवमरणे च गर्भोत्पादयितुर्यावज्जीवं सूतकित्वमित्यर्थः ।

असवर्णमातृजन्येषु शङ्खः—

यद्येकजाता बहवः पृथक्क्षेत्राः पृथग्जनाः ।
एकपिण्डाः पृथक्शौचाः पिण्डस्त्वावर्त्तते त्रिषु ॥

एकस्माद्ब्राह्मणादेर्जाताः पृथक्पृथगाशौचाः, मातृजातीयमेव तेषामाशौचम् । तेषां च त्रिपुरुषमेव सापिण्ड्यम् । तेन चतुर्थ्यादिपुरुषजननमरणयोर्न सपिण्डनिमित्तमाशौचादीति ।

केचिच्च पृथक्जना इत्यत्र पृथक्धना इति पठन्ति । तत्र पृथक्धना विभक्तधनाः । अत एव बौधायनः—

क्षत्रविट्शूद्रजातीनां ये स्तो मृतकसूतके ।
तेषां तु पैतृकाशौचं विभक्तानां तु मातृजमिति ॥

ब्रह्मपुराणेऽपि—

क्षत्रविट्शूद्रजातीनां सापिण्ड्यं तु त्रिपूरुषम् ।
ब्राह्मणैरपि जातानामविभक्तार्थभागिनाम् ॥
विभक्तानां तु सर्वेषां मातुर्जातिरसंशयम् ।

मातुर्जातिरित्यनेन मातृवर्णोचितमाशौचमपीत्युक्तं भवति । एवं च विभक्तानां पितृवर्णोचितमाशौचमित्यर्थात् । प्रतिलोमानां तु न सूतकम् । प्रतिलोमा धर्महीना इति स्मृतेः ।

ब्रह्मपुराणे—

दत्तकश्च स्वयंदत्तः कृत्रिमः कृत एव च ।
भिन्नगोत्राः पृथक्पिण्डाः पृथक्वंशधराः स्मृताः ॥
सूतके मृतके चैव त्र्यहाशौचाः प्रकीर्त्तिताः ।

तथा सजातीयविजातीयभेदतिरस्कारेणावरुद्धस्त्रीणामपि त्रिपुरुषमेव सापिण्ड्यमाशौचविषये ।

वसिष्ठः — अप्रत्तानां तु स्त्रीणां त्रिपुरुषी सपिण्डतेति विज्ञायते इति ।

एतच्चतुर्वर्णसाधारणम् ।

ब्रह्मपुराणे—

शूद्राणां दासवृत्तीनां परपिण्डोपजीविनाम् ।
परायत्तशरीराणां न कश्चित्पुत्र इत्यपि ॥
तस्माद्दास्यां प्रजायन्ते दासाद्धि दास एव हि ।

दासाद्दास्यां जातो दासएवेति नामद्योतनार्थः । ऊढायामुत्पन्नस्यौरसपुत्रत्वात् । अतएवास्य क्षेत्रजादयो न सन्ति । एतदेव स्फोरयति —

इमां च मम मर्यादामुल्लंघ्य निवसन्ति ये ।
शूद्रास्तु तेषां पुत्रास्तु सन्ति द्वादश एव हि ॥

एतद्व्याख्यातं मदनपालेन । शूद्रजातेर्द्विजशुश्रूषा द्विजदास्यं मुख्या वृत्तिः ।

तामिमां मम ब्रह्मणो मर्यादां अतिक्रम्य दास्यं परित्यज्य ये शूद्रा निवसन्ति गार्हस्थ्ये तेषां द्वादशापि पुत्रा औरसक्षेत्रजादयो भवन्ति । तथा,

औरसो यदि नो पुत्रस्त्वथ वा पुत्रिकासुतः ।
विद्यते तत्र तेषां तु विज्ञेयाः क्षेत्रजादयः ॥
एकादश पृथक्गोत्रा वंशमात्रकरास्तु ते ।
श्राद्धादि दासवत्सर्वं तेषां कुर्वन्ति नित्यशः ॥
सूतके मृतके वापि त्र्यहाशौचस्य भागिनः ।

एतच्च त्र्यहाशौचं सम्प्रदर्श्यते । तत्र शूद्रे द्वादशाहं षण्नव क्षत्रवैश्ययोरिति । एवं च त्र्यहात्तूदकदायिन इति वचनात्समानोदकानां त्रिरात्रमुक्तं, तदपि शूद्राणां द्वादशाहमेव भवतीत्यूह्यम् । त्रिरात्रमित्यनुवृत्तौ विष्णुः —

परपूर्वासु भार्यासु प्रसूतासु मृतासु च ।
भर्त्तुः पूर्वपतेश्चापि गृहे यस्यैव विद्यते ॥

परपूर्वः पतिर्यासां ताः परपूर्वाः विवाहसंस्कृतं पतिं परित्यज्यान्यमाश्रिता इत्यर्थः । तादृशीषु स्त्रीषु प्रसूतासु मृतासु वा भर्त्तुः पूर्वपतेश्च तथा यस्य च गृहे स्वयं साम्प्रतं विद्यते तस्यापि च त्रिरात्रमाशौचमिति ।

बृहस्पतिः—

अन्याश्रितेषु दारेषु परपत्नीसुतेषु च ।
मृतेष्वाप्लुत्य शुध्यन्ति त्रिरात्रेण द्विजोत्तमाः ॥

परपत्नीसुताः क्षेत्रजादयः ।

मरीचिः—

सूतके मृतके चैव त्रिरात्रं परपूर्वयोः ।
एकाहस्तु सपिण्डेषु त्रिरात्रं यत्र वै पितुः ॥

यत्र पितुस्त्रिरात्रं तत्सपिण्डानामेकरात्रमित्यर्थः ।

ब्रह्मपुराणे तु—

पित्रा दत्ता तु या नारी स्वातन्त्र्यादन्यमाश्रिता ।
यं यं श्रितवती भूयस्तत्राशौचं भवेत्त्र्यहम् ॥
मृतायां वा प्रसूतायां नान्येषामिति निश्चयः ।
पदे तु सप्तमे यत्र बलात्कारं हृता भवेत् ।
स्वाभिगोत्रं भवेत्तस्यास्तद्वद् भूयो विशिष्यते ॥
पैतृकं तु प्रसूतायां ततः पौर्विकभर्त्तृकम् ।
कामादक्षतयोनिश्चेदन्यं भूयो विशिष्यते ॥
तत्र तस्य सगोत्रा सा यमाश्रितवती स्वयम् । इति ।

यंयमिति। सा यं यमाश्रियते तस्यैव स्वैरिणीमरणादिनिमित्तं त्र्यहमाशौचं भवति । न तु तस्य सपिण्डानां पुत्रादीनामपीत्यर्थः । विशिष्यते विभज्यते ।

तमेव विभागमाह—पैतृकमित्यादिना—अक्षतयोनिरिति। पाणिग्राहेणानुपभुक्तैव यदाऽन्यमुपगच्छति तदा तस्यैव गोत्रं लभते इत्यर्थः। अत्र सपिण्डानामशौचाभावैकाहपक्षौ आपदनापद्गुणवद्भेदेन व्यवस्थाप्यौ।

यत्र ब्राह्मणजातीयस्य पितुस्त्रिरात्रं तत्र शूद्रस्य द्वादशाहं सपिण्डानामेकरात्रमिति पक्षे तु शूद्रजातिवत्सापिण्डानां चतूरात्रमिति विवेकः।

कन्यामरणे तु ब्रह्मपुराणे—

आजन्मनस्तु चूडान्तं यत्र कन्या विपद्यते।
सद्यः शौचं भवेत्तस्य सर्ववर्णेषु नित्यशः।
ततो वाग्दानपर्यन्तं यावदेकाहमेव तु॥
अतः परं प्रदत्तानां त्रिरात्रमिति निश्चयः।
वाग्दाने तु कृते पश्चात् ज्ञेयं चोभयतस्त्र्यहम्॥
पितुः परस्य च ततो दत्तानां भर्त्तुरेव हि।
स्वस्वजात्युक्तमाशौचं स्यात्सूतके मृतके तथा॥

अङ्गिराअपि—

अविशेषेण वर्णानामर्वाक् संस्कारकर्मणः।
त्रिरात्रं तु भवेच्छुद्धिः कन्यास्वह्ना विधीयते॥

तथा, दत्ता कन्या पितुर्गेहे सूयते म्रियतेऽथ वा।
स्वमशौचं चरेत्सम्यक् पृथक् स्थाने व्यवस्थिता॥

तद्बन्धुवर्गेष्वेकेन शुध्यंते जनकास्त्रिभिः ।

पृथक्स्थानेपितुर्भोजनशयनदेवार्चनाद्यन्यस्थाने । तत्र तु प्रसवमरणयोः पितुः संपूर्णाशौचं सपिण्डानां तु त्र्यहमिति हारलतायाम् ।

अत्राऽपि पितुस्त्रिरात्रे शूद्रस्य द्वादशाहं एकाहस्थाने चतुरहः । दशाहस्थाने तु मासमिति योज्यम् । बालाशौचविषये तु अङ्गिराः—

विप्रे न्यूने त्रिभिर्वर्षैर्मृते शुद्धिस्तु नैशिकी ।
द्व्यहेन क्षत्रिये शुद्धिस्त्रिभिर्वैश्ये मृते तथा ।
निवृत्तचूड़के विप्रे त्रिरात्राच्छुद्धिरिष्यते ।
निवृत्ते क्षत्रिये षड्भिर्वैश्ये नवभिरिष्यते ॥
शूद्रे त्रिवर्षन्यूने तु मृते शुद्धिस्तु पञ्चभिः ।
अतऊर्द्ध्वं मृते शूद्रे द्वादशाहो विधीयते ॥
षड्वर्षान्तमतीतस्तु शूद्रः संम्रियते यदि ।
मासिकं तु भवेच्छौचमित्याङ्गिरसभाषितम् ॥

निबन्धान्तरे तु द्वादशवर्षस्य मास इति दर्शितम् ।

मिताक्षराकारस्त्वांगिरसवाक्यान्यनादृत्य वयोऽवस्थाकृतमाशौचं सर्वेषामेव तुल्यमित्याह ।

तदाह व्याघ्रः-तुल्यं वयसि सर्वेषामतिक्रान्ते तथैव च ।
उपनीते तु विषमं तस्मिन्नेवातिकालजामिति ॥

आदन्तजननात्सद्य इत्यादि ।

'यद्वयःकृतमाशौचं यच्च मासत्रये त्रिरात्रं स्यात् षण्मासात्पक्षिणी भवेत् । अहस्तु नवमादर्वागूर्ध्वं स्नानेन शुध्यती'त्यादिना यदतिक्रान्तमाशौचमुक्तम्,

उपनीते मृते यद्विषयं स्वस्वजात्युक्तम्, तस्मिन्नेव तत्कालातिपातकृतमाशौचं, तत्सर्वेषां वर्णानां तुल्यमेव न विषममित्यर्थः । शूद्रस्य तूपनयनस्थाने विवाह एव । षोडशवर्षानन्तरमकृतोद्वाहस्यापि शूद्रस्य मासमेवाशौचम् ।

तदाह शङ्खः—

अनूढभार्यः शूद्रस्तु षोडशाद्वत्सरात्परम् ।
मृत्युं समधिगच्छेच्चेन्मासं तस्यापि बान्धवाः ।
शुद्धिं समधिगच्छन्ति नात्र कार्या विचारणा ।

मातापित्रोस्त्वाचूडादपि त्रिरात्रमेव । आद्विवर्षे प्रेते मातापित्रोर्नाशौचम् ।

शौचमेवेतरेषामेकरात्रं त्रिरात्रं चेति पारस्कर वचनात् । मातापित्रोस्त्रिरात्रमन्येषामेकरात्रमित्यर्थः ।

मनुरपि—

निरपत्यः पुमान् शुक्रमुपस्पृश्य विशुध्यति ।
बैजिकादभिसम्बन्धादनुबध्यादघं त्र्यहम् ॥

वैजिकात् जन्यजनकभावलक्षणसम्बन्धात् त्र्यहमाशौचमित्यर्थः। इदमपि शूद्रस्य द्वादशाहम्।

अथ शूद्रप्रेतानिर्हरणे विशेषः।

मनुः—

दक्षिणेन मृतं शूद्रं पुरद्वारेण निर्हरेत्।
पश्चिमोत्तरपूर्वैस्तु यथायोग्यं द्विजातयः।

विष्णुः—मृतं द्विजं न शूद्रेण हारयेत्।

शूद्रं द्विजेन पितरं च पुत्रा निर्हरेयुः। न द्विजं पितरं मातरमपि शूद्रा इति। शूद्रं द्विजेन नेति। एतत्पुत्रातिरिक्तविषयम्।

तदेवाह—

पुत्राः पितरं निर्हरेयुः। शूद्रमपीत्यर्थः।

अस्यापवादः—

न द्विजं पितरं मातरमपि शूद्रा इति। एतच्च सत्सु द्विजातिषु।

यदाह याज्ञवल्क्यः—

न विप्रं स्वेषु तिष्ठत्सु मृतं शूद्रेण हारयेत्। इति।

ब्रह्मपुराणे—

स्वगोत्रजैर्गृहीत्वा तु चितामारोप्यते शवः।
अधोमुखो दक्षिणदिक्चरणस्तु पुमानपि॥

उत्तानदेहा नारी तु सपिंडैरपि बन्धुभिः ।

एतच्छूद्रनिरग्निद्विजविषयम् ॥

आहिताग्निविषये—

दक्षिणाशिरसम्भूमौ बर्हिष्मत्यां निवेशयेत् । इति कात्यायनोक्तेः ।

ब्रह्मांडपुराणे—

दरिद्रस्तु न दग्धव्यो नग्नः कस्यांचिदापदि ।

केनापि वस्त्रखण्डेनाच्छादितव्यः प्रयत्नतः । इति ॥

एतत्सर्ववर्णसाधारणम् ।

यमः—

न शूद्रो यजमानं वै प्रेतीभूतं समुद्धरेत् ।

यस्यानयाति शूद्रोऽग्निं तृणकाष्ठहवींषि च ॥

प्रेतत्वं हि सदा तस्य सचाधर्म्मेण युज्यते ।

स च शूद्रः । दाहस्तु शूद्रस्यामन्त्रकएव । निषेकादिः श्मशानांतो मन्त्रैर्यस्योदितो विधिरिति मनुना श्मशानेऽपि मन्त्रपर्युदासप्रदर्शनात् ।

तोयांजलिदाने तु **ब्रह्मपुराणे—**

आदौ तु वस्त्रं प्रक्षाल्य तेनैवाच्छादितस्ततः ।

कर्त्तव्यं तैः सचैलं तु स्नानं सर्वमलापहम् ॥

ततः पाषाणपृष्ठे तु सर्वैर्देयं तिलोदकम् ।

एकेनैकेन देयास्तु विप्रेणाञ्जलयो दश ।
राज्ञे द्वादश देयास्तु वैश्याय दश पञ्च च ॥
त्रिंशच्छूद्राय देयास्तु प्रेतभूमिगताय च ।
एतत्त्वेकैकाञ्जलिदानपक्षे ॥
अञ्जलिवृद्धिपक्षे तु नायं संख्यानियमः ।

तदुक्तं तत्रैव ।

दिवसे दिवसे देयः पिण्ड एवं क्रमेण तु ।
एकस्तोयाञ्जलिस्त्वेवं पात्रमेकं च दीयते ॥
द्वितीये द्वौ तृतीये त्रींश्चतुर्थे चतुरस्तथा ।
पञ्चमे पञ्च षट् षष्ठे सप्तमे सप्त एव हि ।
अष्टमेऽष्टौ च नवमे नवैव दशमे दश ।
येन स्युः पञ्च पञ्चाशदतोऽपांजलयः क्रमात् ।
तोयपात्राणि तावन्ति संयुक्तानि तिलादिभिः ॥
देशधर्मान्पुरस्कृत्य प्रेतपिण्डान्वयांस्यपि ।
देयस्तु दशमः पिण्डो राज्ञां वै द्वादशे ऽहनि ॥
वैश्यानां पञ्चदशमे देयस्तु दशमस्तथा ।
शूद्राणां दशमः पिण्डो मासे पूर्णे हि दीयते ॥
पूर्णे हीति मासपूरके ऽह्नीत्यर्थः ।
एतद्दशपिण्डदानपक्षे । तथा च पिंडसङ्ख्यामाह

पारस्करः—

ब्राह्मणे दशपिण्डास्तु क्षात्रिये द्वादश स्मृताः ।
वैश्ये पञ्चदश प्रोक्ताः शूद्रे त्रिंशत्प्रकीर्त्तिताः ॥
प्रेतेभ्यः सर्ववर्णेभ्यः पिण्डान्दद्याद्दशैव च। इति ।

शूद्रस्य पर्णशरदाहादौ त्रैरात्राशौचपातेऽपि दशैव पिण्डा भवन्ति न ततो न्यूनाः ।

तदाह शातातपः—

आशौचह्रासेऽपि पिण्डान्दद्याद्दशैवचेति । तत्र दाने प्रकारमाह—पारस्करः—

प्रथमे दिवसे देयास्त्रयः पिंडाः समाहितैः ।
द्वितीये चतुरो दद्यादस्थिसंचयनं तथा ॥
त्रींस्तु दद्यात्तृतीयेऽह्नि वस्त्रादीन् क्षालयेत्तथा ।
एकोद्दिष्टं च कर्त्तव्यं श्राद्धकर्म्म ततः परम् ॥

ततः परं चतुर्थेह्नीत्यर्थः ।

ब्रह्मपुराणे—

सद्यः शौचेऽपि दातव्यः सर्वेपि युगपत्तथा ।
त्र्यहाशौचे प्रदातव्यः प्रथमे त्वेक एव हि ॥
द्वितीये ऽहनि चत्वारस्तृतीये पञ्च चैव हि। इति ।

सर्वेष्वप्याशौचपक्षेषु दश पिण्डा अवश्यं देयाः । तेषां शरीरपूरकत्वात् । दशभ्योऽधिकानां पिण्डानां तु

दाने प्रेतोपकाराधिक्यमुन्नेयम्। कचिदापदि शून्यैरपि प्रेतशरीरनिष्पत्तिर्भवति तत्र शारोण तथैव बोधनादिति ज्ञेयम्। अविशिष्टमन्यसाधारणत्वान्नोक्तं गोविन्दार्ण-चाद्यवचधार्यम्।

अथैकोद्दिष्टनिर्णयः।

तत्राद्यं श्राद्धमेकादशेऽहनीत्येके।

एकादशेऽह्नि यच्छ्राद्धं तत्सामान्यमुदाहृतम्।

चतुर्णामपि वर्णानां सूतकं तु पृथक् पृथक्॥ इति वृद्धवसिष्ठवचनात्। नचाशुद्धस्य तदा कथमधिकार इति वाच्यम्।

आद्यं श्राद्धमशुद्धोऽपि कुर्यादेकादशेऽहनि।

कर्त्तुस्तात्कालिकी शुद्धिरशुद्धः पुनरेव सः॥

इति शङ्खवचनात्।

सूतकान्तं इत्यपरे। अथाशौचव्यपगम इति विष्णुवचनात्। तत्र देशाचारतो व्यवस्था। एवं वृषोत्सर्गोऽपि। तत्र वृषोत्सर्जनहोमस्य वैदिकमन्त्रसम्बन्धित्वात्तत्र न शूद्रस्याधिकार इति होमरहिते एव तस्मिन् शूद्रोऽधिकारी। तत्र च ब्राह्मणनिमन्त्रणादि तत्पूर्वदिने तद्दिने वा कर्त्तव्यम्। तत्प्रकारश्च उक्तः सर्ववर्णसाधारणोऽन्यत्रैव। विशेषस्तु—

दक्षिणं चरणं विप्रः सव्यं वै क्षत्रियस्तथा ।
पादावादाय वैश्यो द्वौ शूद्रः प्रणतिपूर्वकम् । इति ॥

निमन्त्रणं चेत्क्वचिच्छाखायां मन्त्रपाठोऽप्यस्ति । तत्र तच्छाखीयोपदिष्टशूद्रकर्तृके निमन्त्रणे तत्स्थाने नमः-शब्द एव मन्त्रत्वेनाऽवधार्यः । येषां तु न मन्त्रः किन्तु वाक्यमेव तत्र तदुपदिष्टशूद्रेणापि वाक्यमेव पठनीयं न नमःशब्दोऽपि । एवं पाद्यासनादिदानेष्वपि नमो-मन्त्रप्रयोगाप्रयोगौ ज्ञेयौ । पाद्यदानानन्तरं तु ब्राह्मणः सव्यं चरणं प्रक्षालनार्थं शूद्राय प्रयच्छेत् । 'सव्यं शूद्रायेति' वचनात् । शेषं समानम् । सपिण्डीकरण-कालस्तु संवत्सरान्तो मुख्यः ।

सपिण्डीकरणं कुर्याद्यजमानस्त्वनग्निमान् ।
अनाहिताग्नेः प्रेतस्य पूर्णेऽब्दे भरतर्षभ ॥

द्वादशेऽहनि षष्ठे वा त्रिपक्षे वा त्रिमासे वा । 'एकादशेऽपि वा मासि मङ्गलं स्यादुपस्थित'मिति भविष्यपुराणात् । तदशक्तावेकादशो मासो मुख्यो भविष्यपुराणस्वरसात् । प्रधानकालप्रत्यासत्तेश्च क्रम-नियामकत्वात् । तदशक्तौ संवत्सरान्ते विसर्जनं न च मासमित्येकम् । इति पैठीनसिवचनान्नवमो मासः । तदशक्तौ पूर्णे संवत्सरे । षण्मासे त्रिपक्षे वा यदहर्वा

वृद्धिरापद्येतेति गोभिलवचनात् षण्मासः। तदशक्तौ त्रिमासे भविष्यदुक्तत्वात्। ततस्त्रिपक्षः। अत्राशौचव्यपगमादूर्ध्वं द्वादशसु दिनेषु क्रमेण मासिकानि कृत्वा द्वादशेऽहनि द्वादशमासिकं समाप्य त्रयोदशेऽहनि सपिण्डनमित्येके। तदशक्तावेकस्मिन्नेव दिने द्वादशमासिकानि कृत्वा तत्रैव सपिण्डनं कार्यम्।

मुख्यं श्राद्धं मासि मासि अपर्याप्तावृतुं प्रति।

द्वादशाहेऽथवा कुर्यादेकाहे द्वादशेऽथवा। इति मरीचिवचनात्।

एवं वृद्धिविषयेऽपि। तत्र यदहर्वा वृद्धिरापद्येत तदहरिति गोभिलवचनात्। एषां च कालानां मध्ये द्वादशाहः प्रशस्त इत्याह व्याघ्रः।

आनन्त्यात्कुलधर्माणां पुंसां चैवायुषः क्षयात्।
अस्थिरत्वाच्छरीरस्य द्वादशाहः प्रशस्यते। इति॥

वृद्धमनुः—

द्वादशेऽहनि विप्राणामाशौचान्ते तु भूभृताम्।
वैश्यानां तु त्रिपक्षादावथवा स्यात्सपिण्डनम्। इति॥

शूद्रस्य तु द्वादशाह एव मुख्यः सपिण्डनकालः। तदाह सपिण्डताऽनुवृत्तौ विष्णुः—

मन्त्रवर्जं हि शूद्राणां द्वादशेऽहनि कीर्त्तितम्। इति।

कर्तुस्तात्कालिकी शुद्धिरितिवचनादाशौचमध्ये-ऽपि तन्न विरुध्यते इति मध्यदेशाचारः ।

पौरस्त्यास्तु 'अथाशौचव्यपगमे' इति विष्णुवचनात्,

शूद्रस्य दशमः पिण्डो मासे पूर्णे प्रदीयते ॥

इत्यादिवाक्यानुरोधाच्च सूतकान्तएव सपिण्डनमित्याहुः।

सपिण्डीकरणं चेदगेकोद्दिष्टपार्वणोभयात्मकम् । तत्र प्रेतस्थाने एकं ब्राह्मणमेकोद्दिष्टार्थं ताम्बूलादिना निमन्त्र्य पितामहादिपार्वणार्थं प्रत्येकं युगपद्वा वैश्वदेवपूर्वं ब्राह्मणान्निमन्त्रयेत् । तत्र निमन्त्रणवाक्ये शूद्रस्य अस्मत्पितामहस्य अमुकगोत्रस्य स्थाने क्षणं दत्वा भवद्भिः प्रसादः कर्त्तव्यः इत्यादिप्रयोगः कार्यः । यस्य शूद्रस्य पिता द्विजातिः । पितुः शूद्रत्वेऽपि वा तत्पितृपितामहा द्विजातयः, तदा ब्राह्मणक्षत्रियवैश्यजात्यपेक्षया क्रमेण शर्म्मवर्म्मगुप्तप्रयोगाः । यस्य कुले पित्रादयोऽप्यवरुद्धादिजातास्तेनाऽवरुद्धादिजातः पित्रादिरशुद्धोऽपि परिणीतजातैः पितामहादिभिर्योजनीयः । जन्यजनकभावस्य विद्यमानत्वात् ।

तत्रैकोद्दिष्टकर्त्तव्यमाह कात्यायनः—अथैकोद्दिष्टमेकं पात्रमेकोऽर्घ एकः पिण्डः नावाहनं नाग्नौकरणं नात्र वैश्वदेवाः सुहितामिति तृप्तप्रश्नः सुस्वदितमित्यनुज्ञानमुप-

तिष्ठतादक्षय्यस्थानेऽभिरम्यतामिति विसर्गेऽभिरताःस्म इत्यपर इति ।

याज्ञवल्क्यः—

एकोद्दिष्टं दैवहीनमेकार्घ्यैकपवित्रकम् ।
आवाहनाग्नौकरणरहितं ह्यपसव्यवत् ॥

मत्स्यपुराणे—

स्वदितं विकिरे ब्रूयाद्विसर्गे चाभिरम्यताम् । इति ।
विकिरपिण्डस्थाने स्वदितमित्येव ब्रूयात् ।

न विकिरपिण्डं दद्यादित्यर्थः ।

यत्त्वाश्वलायनगृह्यपरिशिष्टे—

एकोद्दिष्टं तु यच्छ्राद्धमित्युपक्रम्य—
उल्लेपणं भूमिगतं विकिरं लेपमौदकम् ॥
अनुप्रेतेषु विसृजेदप्रजानामनायुषम् ।
अनुद्दिश्य तु प्रेतस्य सर्वत्रैवं प्रयुज्यते ॥
एकं पवित्रमेकं पिण्डं नाग्नौकरणं न स्वधा नाभिरम्यताम् ।
स्वस्त्यस्त्वु विसृजेदेवं सकृत्प्रणववर्जितम् ।
एकोद्दिष्टस्य पिण्डे तु अनुशब्दो न विद्यते ॥
पितृशब्दं न कुर्वीत पितृहा चोपजायते ।
औदकं उदकसम्बन्धिनं लेपम् । अन्नोदकहस्त-

स्य- दर्भेषु मार्जनामित्यर्थः। अनुप्रेतेष्विति। अनुशब्दः पूर्वत्ववाची। पूर्वमृतेषु मध्ये ये अप्रजाः तेषां विसृजेत्। अनायुषामित्यायुःशब्दः संस्कारोपलक्षकस्तेनासंस्कृतानामित्यर्थः।

तथा च मन्त्रलिङ्गम्—

असंस्कृतप्रमीता ये त्यागिन्यो याः कुलस्त्रियः।
दास्यामि तेभ्यो विकिरमन्नं ताभ्यश्च पैतृकम्। इति।

अनुद्दिश्येति। प्रेतस्योद्देशेन यत्रैकचनैकोद्दिष्टे पार्वणादौ वा उत्सृज्यते तत्र सर्वत्रैवमेवानुप्रेतेषूच्छेषणविकिरादि देयम्। तत्रैवं व्यवस्थापयन्ति। सपिण्डीकरणप्राग्भाविषु एकादशाहादिषु विकिरस्थाने स्वाहेति शब्दोच्चारणं स्वधाकारप्रतिषेधश्च। नाभिरम्यतामिति। 'ये च त्वामत्रान्वि'ति मन्त्रोऽनुशब्देन लक्ष्यते स न प्रयुज्यत इति +++++ शब्दामिति। पितरोऽत्र दिव्यास्तेषां शब्दो वसुरुद्रादित्यरूप इत्यादिस्तन्नोच्चारयेत्। अत्रान्यः श्राद्धेतिकर्त्तव्यताविशेषस्सर्वसाधारणः सर्वत्र सुप्रसिद्ध इति न लिख्यते।

ननु शूद्रस्य कथं गोत्रप्रवरसम्बन्धः। अद्विजत्वात्। द्विजानामेव गोत्रप्रवरप्रवर्त्तकत्वात्। तथा च

मत्स्यपुराणे मनुः—

ऋषीणां नामगोत्राणि वंशावतरणं तथा ।
प्रवराणां तथा साम्यमसाम्यं विस्तराद्वद ॥ इति

प्रश्ने—

मत्स्य उवाच—

भृगुश्च लोम्नश्च सुतां दिव्यां भार्यामविन्दत ।
तस्यामथ सुता जाता देवा द्वादश याज्ञिकाः ॥
मनवो भानवश्चैव सुजन्यः सुजनस्तथा ।
क्रतुः शुचिश्च मूर्द्धा च जन्यश्च वसवश्च ह ॥
प्रभवश्चाव्ययश्चैव दक्षो द्वादशकस्तथा ।
इत्येते भृगवो नाम देवा द्वादश कीर्त्तिताः ॥
पौलस्त्यो जनयेद्विप्रं देवानां तु कनीयसम् ।
च्यवनं तु महाभागं मन्दधानं तथाऽप्यसौ ॥ इति।

अत्र सर्वत्र द्विजानामेव गोत्रप्रवर्त्तकत्वमभिहितम्। अत एव द्विजानामेव गोत्रमुपदिष्टं कल्पसूत्रकारैः। क्षत्रियवैश्ययोस्त्वौपदेशिकप्रवराभावेऽप्यतिदेशतस्तत्प्राप्तिः ।

यदाहाऽऽश्वलायनः—यजमानस्यार्षेयान् प्रवृणीते। पौरोहित्यान् राजन्यविशामिति ।

आधानादिषु प्रवरातिदेशात्तद्द्वारा गोत्रमप्यतिदिश्यते । यतोऽमुकगोत्राणाममुकप्रवराणामिति गो-

त्रमुपलक्षणीकृत्य प्रवरा भवन्ति। शूद्रस्य तु यज्ञसंयोगाभावादतिदेशेनापि न तत्प्रसक्तिः। यज्ञसंयोगाभावश्च शूद्रस्य कूर्मपुराणे दर्शितः।

ससर्ज ब्राह्मणान् वक्त्रात् क्षत्रियांश्च भुजाद्विभुः।
वैश्यानूरुद्वयादेष पद्भ्यां शूद्रान् पितामहः॥
यज्ञनिष्पत्तये ब्रह्मा शूद्रवर्जं ससर्ज ह॥ इति।

अत्राहुः। कमपि सत्कुलोत्पन्नं मूलपुरुषं प्रसिद्धमुपलक्षणीकृत्य तन्नाम्ना गोत्रव्यवहारः।

ये च परिणीतायां शूद्रायां द्विजातिभ्य उत्पन्नास्तेषां च यावत्पिण्डनिवृत्तिस्तावत्तद्गोत्रेणैव व्यवहारात्तत्परम्परायामपि तद्गोत्रेणैव व्यवहरन्तीति लोके गोत्रव्यवहारः शूद्राणाम्। अनेनैवाभिप्रायेण बौधायनः—

चतुर्णामपि वर्णानां पितॄणां पितृगोत्रतः॥ इति।

उपदेशकब्राह्मणगोत्रमेवास्य गोत्रमित्यन्ये। अत एव शूद्रलक्षणमित्थमाचक्षते परीक्षकाः।

गोत्रप्रवरसम्बन्धो नास्ति येषां कथञ्चन।
उपदेशातिदेशाभ्यां शूद्रा वर्णेषु ते स्मृताः॥ इति।

हेमाद्रिस्तु—शूद्राणां गोत्रस्याभावाद्गोत्रतः पिण्डदानमित्येतद्द्विजात्युत्पन्नशूद्रविषयं भवितुमर्हति। अथवा 'तस्मादाहुः प्रजाः सर्वाः काश्यप्यः' इति श्रुतेः

सर्वेषां चैव शूद्राणां काश्यपं गोत्रमर्हति । तथाच व्याघ्रपात्—गोत्रनाशे तु काश्यप इति ।

अथ श्राद्धनिर्णयः ।

'तत्र भार्यारतः शुचिर्भृत्यभर्त्ता श्राद्धक्रियापरः' इति शूद्रस्य श्राद्धे सामान्यतोऽधिकारो दर्शितो याज्ञवल्क्येन । श्राद्धं प्रकृत्य मत्स्यपुराणेऽपि—

शूद्रोऽप्यमन्त्रवत्कुर्यादनेन विधिना ततः ॥ इति ।

एवं शूद्रोऽपि सामान्यं वृद्धिश्राद्धं च सर्वदा नमस्कारेण मन्त्रेण कुर्याच्चामान्नवत् बुध इति । सामान्यं साधारणम् । वर्णविशेषाऽनुपादानेन प्रवृत्तं सामान्यमनग्निब्रह्मचारिविधुरविधवाशूद्रादीनामपि कर्त्तव्यममावास्यायुगादिमन्वादिग्रहणव्यतीपातादिनिमित्तं नित्यं नैमित्तिकं काम्यं वा तत्सर्वमुच्यते। आमान्नवदिति। आमेनैव कुर्यादित्यर्थः। तदाहोशनाः—

आपद्यनग्नौ तीर्थे च चन्द्रसूर्यग्रहे तथा ।
आमश्राद्धं द्विजो दद्याच्छूद्रो दद्यात्सदैव हि ॥

यत्तु वराहपुराणे—

सच्छूद्रस्य पाकश्राद्धेऽधिकारो दर्शित इति ।
+ + + + + कर्त्तव्यं पाके भोजनमेव च ।
शुश्रूषामभिपन्नानां शूद्राणां च वरानने ।

दिने त्रयोदशे + + + + + + + द्विजान् ॥
पञ्चविधिः प्रयोक्तव्यः शूद्राणां मन्त्रवार्जितः ।
अमन्त्रस्य च शूद्रस्य विप्रो मन्त्रेण गृह्यते ॥ इति ।
अयमत्यन्तं लोकविद्विष्टत्वाद्युगान्तरविषय इत्याहुः ।

मत्स्यपुराणे—

आमश्राद्धं यदा कुर्याद्विधिवच्छ्राद्धदस्तदा ।
तेनाऽग्नौकरणं कुर्यात्पिण्डांस्तेनैव निर्वपेत् ॥

अत्र यदा तदेति द्विजाभिप्रायम् । शूद्रस्य नित्यमामश्राद्धविधानात् । युगान्तराभिप्रायं वा । तेनैवेत्येवकारोऽप्यर्थः । पायससक्त्वादिपिण्डानामपि विधिदर्शनात् । अग्नौकरणं तु शूद्रस्यापि भवति । तथा च हेमाद्रौ भविष्यपुराणम्—

धर्मेप्सवश्च धर्मज्ञा यदि शूद्रः प्रवर्त्तते ।
अग्नौकरणमन्त्रश्च नमस्कारो विधीयते ॥
आवाहनादि कर्त्तव्यं तथा शूद्रेण तच्छृणु ।
देवानां देवनाम्ना तु पितॄणां नामगोत्रतः ॥
पिण्डादीन्निर्वपेद्धीरनामतो गोत्रतस्तथेति ।

तच्च जलादौ कार्यम् ।

अग्न्यभावे तु विप्रस्य पाणौ वा च जलेऽपि वा ।
अजाकर्णेऽश्वकर्णे वा गोष्ठे वा च शिवान्तिके ।

इति मत्स्यपुराणात्। अत्र यद्यपि सामान्यतः शूद्रस्य श्राद्धमात्रे ऽधिकार उक्तस्तथापि यानि साम्नीनामेव विहितानि पिण्डान्वाहार्यकादीनि तत्र शूद्रा नाधिक्रियन्ते। तेषामाहि + + + + + +

[अत्रग्रन्थस्त्रुटितः]

+ + + + ... श्चैव महादेवेति च क्रमात्।

मृदाहरणसङ्घट्टप्रतिष्ठाकालमेव च।
स्नपनं चैव पूजार्थं नमस्कारो विसर्जने॥

ॐ हरायनमः—मृदमादत्ते।
ॐ महेश्वराय नमः सङ्घट्टयामि॥
ॐ स्वयम्भुवे नमः प्रतिष्ठापयामि।
ॐ शूलपाणये नमः आवाहयामि॥
ॐ पिनाकधृषे नमः स्नपयामि।
ॐ महादेवाय नमः पूजयामि॥
ॐ पशुपतये नमः नमस्करोमि।
ॐ महादेवाय नमः क्षमस्व विसर्जनम्॥
ॐ शिवाय क्षितिमूर्त्तये नमः।
ॐ भवाय जलमूर्त्तये नमः।
ॐ रुद्राय अग्निमूर्त्तये नमः॥
ॐ उग्राय वायुमूर्त्तये नमः।

ॐ भीमाय आकाशमूर्त्तये नमः ॥

ॐ पशुपशतये यजमानमूर्त्तये नमः ।

ॐ महादेवाय सोममूर्त्तये नमः ॥

ॐ ईशानाय सूर्यमूर्त्तये नमः ।

ॐ दक्षिणामूर्त्तिरूपाय तस्मै श्रीगुरुमूर्त्तये नमः ॥

पयस्येव तीर्थे विसर्ज्याः ।

भौमेऽर्के भृगुजे मघागृहानिशासतम्यनङ्गाह्वया
नन्दाजन्मदिनेषु सन्धियुगले नो तर्पणं स्यात्तिलैः ॥
नोद्वाहव्रतचौलवृद्धिषु समार्द्धार्धैकमासे क्रमा-
न्नो दुष्येत्तु मृतौ महालयगयापुण्याहतीर्थातिषु ॥
वृद्धौ प्राङ्मुखमेव सव्यमृजवो दर्भास्तिलार्थो यवैः
पिण्डा वा पितृमन्त्रवर्जितजपो युग्मं द्विजा न स्वधा ॥
दैवं तीर्थमुशान्ति नो मधुमतीं तृप्तौ च सम्पन्नवत्
प्रीयन्तामिति चाक्षयेति प्रणुयात्कर्कन्धुदध्यक्षतैः ॥

दिङ्मात्रमेतदुक्तम् । अन्यत्सर्वं गोविन्दार्णव एव प्रपञ्चितमित्युपरम्यते ।

शिष्टानामवधिर्गुणैकजलधिः सत्सम्पदां शेवधिः
श्रीमत्केशवदासतः समजनि श्रीमान्पिलाजीति यः ॥
तस्यैतस्य कृते कृतेऽत्र कृतिना कृष्णेन शेषेण स-

च्छूद्राचारशिरोमणौ पितृमख (प्रख्यो) विवेको ऽभवत् ॥ १ ॥

गुणागुणपरीक्षणक्षणविचक्षणोऽनुक्षणं
वितीर्णबहुदक्षिणः स्वजनरक्षणे दक्षिणः ॥
जयत्यतुलविक्रमोज्ज्वलितदक्षिणाशामुखः
प्रतिक्षापितशात्रवः क्षितितले पिलाजीनृपः ॥
हरिचरणसरोजावाप्तजन्मा द्विजन्मा-
ऽर्पणाविहितविभूतिः स्वर्धुनीपूर्वजन्मा ॥
व्यरचयदतियत्नात्केशवस्यात्मजन्मा
सकललघुनिबन्धं शेषकृष्णं प्रयुज्य ॥ २ ॥

इति श्रीहरिचरणसरोजप्रसूतवर्णवंशावतंसपरमवैष्णव
श्रीपिलाजीसमुद्योजितशेषकृष्णविरचितः
शूद्राचारशिरोमणिः समाप्तः ।

THE PRINCESS OF WALES SARASVATI BHAVANA STUDIES

(SANSKRIT)

SARASVATALOKA

Edited by

GOPINATH KAVIRAJ, M. A

'rana I (In progress)

'a) Mangalam, etc, by Nārāyaṇa S'āstri Khiste.

Mimansaka mata samgraha, by Haranchandra Bhaṭṭācharya.

S'rimad Ācharya Mandana Mis'ra by Chinna Swami S'astri.

.) Bhagavato Buddhasya Chaitama Upades'as'cha, by Gopinatha Kaviraj.

ına I (Supplement)

n°krita Kavi Parichaya-(Bharavi) by Nanda Kishore Sharma

II (In progress)

"āradā Prasādanam by Nārāyāna S'āstri Khiste.

Chūḍāmani Dars'anam by S'as'adhara Tarkachūdāmaṇi.

To be had of

The Superintendent

Government Press, U. P.,

Allahabad.